# १. गृहार्च, देवालयार्चः

## गृहार्चः :-

चित्रबिम्बाः गृहे स्थापयति चेत्- २cm उपरि अधिकं भवति चेदपि दोषः नास्ति।। गृहे मृत्तिक, दारु, शिला विग्रहानि न अर्चनीयः गृहे पूजामंदिरम् वायव्यदिशां वा अथवा नैऋति दिशां वा निर्माणः करणीयः ।। ४cm उन्नतरूपेण मूलविग्रहः स्थापनीय- ।। १२ अंगुल प्रमाणः विग्रहः मध्यमफलं दास्यति ।। ८ अंगुलप्रमाण विग्रहः अपि भवेयुः ।। मानांगुल प्रमाणेन गृहे विग्रहः स्थापनीयः। हस्तमात्र प्रमाणस्य अधिकं न भवेत्, १२ अंगुलप्रमाणाः न्यूनं न भवेत्।।

१) ब्राह्मणाः पूजां कुर्वन्ति गृहार्चः = 24 मानांगुलाः।।
२) क्षत्रियः पूजां कुर्वन्ति गृहार्चः = 21 मानांगुलाः।।
३) वैश्यः पूजां कुर्वन्ति गृहार्चः = 19 मानांगुलाः।।
४) शूद्रः पूजां कुर्वन्ति गृहार्चः = 17 मानांगुलाः ।।

## अर्थचित्र, चित्राऽभास प्रतिमाविषयः :-

गृहे रेखचित्राः चित्ररहितः क्वचित् प्रमाणानि दैवरूपेण पूजनं करोति चेत् मानवानां भुक्तिः लोपः न भवति ।।

## १.लोहविग्रह प्रमाणः :-

१) ब्राह्मणः पूजां कर्तुं = 12 मानांगुलाः।।
२) क्षत्रियः पूजां कर्तुं = 9 मानांगुलाः।।
३) वैश्यः पूजां कर्तुं = 7 मानांगुलाः।।
४) शूद्रः पूजां कर्तुं = 5 मानांगुलाः ।।

गृहे शतृसंहाररूपेण, देवालये, गृहे चतुर्मख ब्रह्मा; वीरलक्ष्मी देवी; विश्वरूपमूर्ति; भार्गवपरशुरामः इत्यादि देवतानां अर्चना न करणीयः।। गृहे वायव्यदिशां विग्रहस्य अर्चनः करणीयः।। बृहत् भवनेषु यजमानि इष्टानुसारेण कुत्राऽपि पूजां कर्तुं शक्यते ।। शिला, दारु उपयुज्य कृतः विग्रहः गृहे न अर्चनीयः।। आगमशास्त्र, वेदशास्त्र ब्राह्मणाः गृहे देवस्य अर्चनाकाले बलिः दास्यन्ति।। गृहे होमः न करणीयः।। गृहे अर्चनां करोति विग्रहस्य उन्नतिः ६,८,१२ अंगुलाः भवेयुः।।

## २.विष्णुद्वारपालकाः :-

१) गर्भगृहस्य प्राक्द्वारे दक्षिणभागे (१) चन्द्रः उत्तरभागे (२) प्रचण्डः
२) अन्तर्मण्डल प्रकारे प्राक् पश्चिम दिशायां (३) जयः (४) विजयः शंख, चक्रधारिणः भवन्ति ।।

**३.अन्तर्हारप्राकारे :-**

(a) प्राक्द्वारपालकाः -(५) धातृ (६) विधातृ पदन्म, गदा धारिणः भवन्ति।।

(b) दक्षिणद्वारपालकाः -(७) भद्र (८) सुभद्र खड्ग, शारङ्ग धारिणः भवन्ति।।

(c) पश्चिम द्वारपालकाः - (९) कृतांत (१०) असुर द्वंसकः वज्र, मुसल धारिणः भवन्ति।।

(d) उत्तरद्वारपालकाः - (११) कुबेराक्ष (१२) कुबेरकः पाश, अंकुश धारिणः भवन्ति ।।

**४. मर्यादावरणे :-**

(a) प्राक्द्वारे - (१३) दुर्जय- (१४) प्रबलः

(b) दक्षिमद्वारे - (१५) विश्वभावनः (१६) पुष्पकः

(c) पश्चिमद्वारे - (१७) सम्भवः (१८) प्रभवः

(d) उत्तरद्वारे - (१९) सुशोभन- (२०) सुभद्रकः

**५. पञ्चमावरणे :-**

(a) प्राक्द्वारे - (२१) कुमुदः (२२) कुमुदाक्षः

(b) दक्षिणद्वारे - (२३) पुण्डरीकः (२४) वामनः

(c) पश्चिमद्वारे - (२५) शंकुकर्णः (२६) सर्वनेत्रः

(d) उत्तरद्वारे- (२७) सुमुखः (२८) सुप्तितिष्ठः

**६. पादगोपुरे :-**

प्राक् भागे - (२९) सूर्यः ; पश्चिमभागे (३०) चन्द्रः

**७.बलिपीठे :-**

(३१) आमोदः (३२) प्रमोदः।। आहत्य ३२ द्वारपालकाः भवन्ति।।

**वैष्णवस्य जाता शौच, मृता शौचः नास्ति :-**

विष्णुतत्वं त्रिकरणि शुद्ध्या मनसि संस्थाप्य अनुष्ठान ब्राह्मणस्य सूतक, मृताशौचः न भवति।। "ओं नमो भगवते वासुदेवाय" इति द्वादशाक्षर मन्त्रः पञ्चशतवारं जपं करणीयः।। अन्येषां स्पर्शनं, अन्येषां गृहे भोजनखादनं अन्येषां कृते किमपि दातव्यं, दशमदिने क्षौरकर्म, तिलोदकः इत्यादीनि त्याज्यानि।।

**देवमुखः - सोमसूत्रदिशः :-**

स्वामिमुखः प्राक्पश्चिमदिशायां भवति चेत् जल प्रणाली उत्तरदिशौ भवेत् ।। स्वामिमुखः उत्तर, दक्षिण दिशायां भवति चेत् जलप्रणाली प्राक्दिशौ भवेत्।। सोमसूत्रः प्राक् दिग्भागे भवति चेत् धन, धान्य, सम्पदः

भवति।। दक्षिणदिग्भागे भवति चेत् आयुर्वुद्धिः।। पश्चिम दिग्भागे भवति चेत् कीर्तिः एश्वर्यः।। उत्तरदिग्भागे यजमानस्य, ग्रामस्य, सकललोकस्य भोग, भाग्यः भवति।।

**लक्ष्मी अर्चन मण्डपः :-**

आश्वयुजमासे श्रीवरलक्ष्मी शरन्नवरात्रि उत्सवेषु, फाल्गुणमासे पूर्णिमादिने श्रीकामव्रतेषु मण्डपस्य चित्र, विचित्र वर्णेन सुगन्धपुष्पैः अलंकारं कृत्वा मण्डपनिर्माणः करणीयः।।

**मण्डपस्य :-**

(a) आग्नेयकोणे - गुग्गुः इति नाम्ना दिव्यगजेन्द्रः।।
(b) नैऋतिकोणे - कुरण्डः इति नाम्ना दिव्यगजेन्द्रः ।।
(c) वायव्यकोणे - दमकः इति नाम्ना दिव्यगजेन्द्रः ।।
(d) ईशान्यादिकोणे - शलः इति नाम्ना दिव्यगजेन्द्रः ।।

निर्माणं कुत्वा सकलजगन्मातः महिषासुरमर्थिनि श्रीमहालक्ष्मी सेवा करणीया ।। सिंह विष्टर पार्श्वेषु १) महापद्मनिधि २) पद्मनिधि ३)शंखनिधि ४)मकरनिधि ५)कच्चपनिधि ६)मुकुन्दनिधि ७)कुन्दनिधि ८)नीलनिधि ९)परनिधि इति नवनिधयः सन्ति।। एतानि नवनिधय- सर्वदा मातायाः सेवाकुर्वन् इति रूपेण निर्माणः करणीयः ।।

**होमकाले उच्चारण मन्त्रशब्दाः - फलिताः :-**

१) देवता प्रीत्यर्थं सर्वदा "स्वाहा" इति।।
२) वांच्छार्थ सिद्ध्यर्थं "वैषट्" इति।
३) शान्त्पर्थं "तम्" इति ।।
४) सर्वव्यापनार्थं "वषट्" इति।।
५) पितृक्रियेषु "स्वथा" इति ।।
६) मारणकर्मेषु "फट्" इति ।।
७) शतृपराजयार्थं "हुं" इति।।
८) वशीकरणार्थं "ह्रीं" इति।।
९) मोक्षप्राप्त्यर्थं "नमो" इति उच्चारणः करणीयः।।

**कुण्डलाः - दिशयः - आकृतयः :-**

(a) चतुरस्त्र कोण कुण्डः - प्राक्दिशौ।।
(b) धनुशकार कुण्डः - दक्षिणदिशौ ।।
(c) पद्माकार कुण्डः - पश्चिमदिशौ ।।
(d) त्रिकोणाकार कुण्डः - उत्तरदिशौ।।
(e) चतुष्कोण कुण्डः - आग्नेय कोणे ।।

**अष्ट कुण्डकल्पनम् :-**

(a) प्राक् दिशौ - चतुरश्र कुण्डः ।।
(b) आग्नेय दिशौ - योनि कुण्डः ।।
(c) दक्षिण दिशौ - घन कुण्डः ।।
(d) नैऋति दिशौ - षट्कोण कुण्डः ।।
(e) पश्चिम दिशौ - वृत्त कुण्डः ।।
(f) वायव्य दिशौ - पञ्चाश्र कुण्डः ।।
(g) उत्तर दिशौ - त्रिकोण कुण्डः ।।
(h) ईशान्य दिशौ - अष्टकोण कुण्डः।।

**देवालयार्चः :-**

आलयाः विमानगोपुरः समचतुरश्रः भवति चेत् मानवानां शांति, पुष्टिः भवति।। वृत्तकारः भवति चेत् मोक्षः, सर्वशुभः।। विमानगोपुरः चतुरस्रः भवति चेत् काम्याः सिद्ध्यति ।। आलये गर्भगृहस्य एकद्वारः स्थापनीयः।। अन्यत् द्वारं वा गवाक्षं वा स्थापयति चेत् वंश नाशः भवति।। धन, धान्य, सुख, सन्तोष, भोग,भाग्य, सम्पदाः निर्मूलः भवति।। व्याधिग्रस्थाः भवन्ति।।

**आयणानि - फलानि :-**

१) ध्वज २) धूम ३) सिंह ४) श्वान ५) वृष ६) गार्थभ ७) गज ८) काक एतासु अष्टसु आयनेषु ध्वज, सिंह, गज, वृष आयणानि श्रेष्ठः। धूम, ध्वांक्ष, खर, श्वास आयणानि दृष्टः।।

**दिक् परीक्षा :-**

प्रप्रथमतया शास्त्रोक्त विधानेन दिक् परीक्षां कृत्वा, प्राक्दिशः निश्चयः करणीयः।। तदनन्तरं दक्षिण, पश्चिम, उत्तर दिशिषु आग्नेय, नैऋति, वायव्य, ईशान्य कोणेषु वा निर्धारणं कृत्वा द्वारस्थान निर्णयः आचरणीयः।।

**शिलाग्रहण दोषणम् :-**

विष्ण्वालयस्य अन्येषां विष्ण्वालयस्य षाषाणः, शिलाः, दारुः इत्यादि न उपयुज्यन्ते।। यदि उपयोगः करोति चेत् यजमानः, यजमानस्य वंशः नरकलोके बहुकष्टाः अनुभूय पुनः भूलोके शुनकरूपेण जननं प्राप्नोति।। मठाः कूपः, तटाकः एतेषां शिलाः पाषाणः, दारुः देवालयस्य निर्माणे न उपयोक्तव्यं।। यदि उपयोगः करोति चेत् बहुकष्टाः अनुभूय आलयनिर्मातः पुनः भूलोके दरिद्ररूपेण जननं प्राप्नोति।। अहं निर्माणं करोति विष्ण्वालयः एव इति चिन्तयित्वा अन्यत् विष्णवालयस्य शिलाः उपयुज्यन्ते चेत् बहुवारं कष्टं अनुभूय नरकलोकं प्राप्नोति।।

**अंगुलमानः - भेदाः :-**

---

अंगुलः पञ्चविधाः भवन्ति।। १) मानांगुलः २) मानांतरांगुलः ३) मात्रांगुलः ४) मुष्टि अंगुलः ५) देहलब्दांगुलः।।

८ परमाणवः - १ केशः
८ केशाः - १ लीक्षः
८ लीक्षाः - १यूकः
८ यूकाः - १ यवः
८ यवाः - १ अंगुलः
८ यवाः प्रमाणं भवति - उत्तम मानांगुलः
७ यवाः प्रमाणं भवति - मध्यम मानांगुलः
६ यवाः प्रमाणं भवति - अधम मानांगुलः

**देवालयनिर्माण फलम् :-**

---

कर्ता "अहं देवालयनिर्माणं करिष्ये" इति संकल्पः भवति चेत् तस्य शतसंवत्सर पूर्वतः यद्कृतं पापं तत्सर्वं नश्यति।। देवमन्दिरम् आरम्भः कृतः कर्ता तत् समापन पूर्वमेव मरणं प्राप्नोति चेदपि तेषां कृते देवालयसम्पूर्ण निर्माणफलं प्राप्नोति।। कति पाषाणः उपयुज्य कर्ता आलय निर्माणं करोति तावत् संवत्सराणि देवलोके पूज्यः भवति।।

**देवालयप्रतिष्ठास्थान फलम् :-**

---

a) पर्वतशिखरेषु प्रतिष्ठापनं करोति चेत् - उत्तमफलम्।। b) अरण्येषु प्रतिष्ठां करोति चेत् - मध्यमफलम्।। c) नद्यां तीरे प्रतिष्ठां करोति चेत् - अथमफलम्।। d) ग्रमेषु, पट्टणेषु प्रतिष्ठां करोति चेत् - अथमाऽथम फलम्।।

**आलयद्वार दिशाः - फलानि :-**

---

१) प्राक् दिशायां मुखद्वारः निर्माणः परोति चेत् - यजमानस्य, ग्रामस्य, देशस्य सुखः।। २) पश्चिमदिशायां मुखद्वारः निर्माणं करोति चेत् - लोकस्य सर्वविध पुष्टिः भवति।। ३) उत्तरदिशायां मुखद्वारः निर्माणं करोति चेत् - धनवृद्धिः।। ४) दक्षिणदिशायां मुखद्वारः निर्माणं करोति चेत् - मोक्षप्राप्तिः भवति।।

**विग्रहभेदाः :-**

---

विग्रहः त्रिविधाः भवन्ति।। १) चित्रः २) अर्थचित्रः ३) चित्राऽभासः।।

**१)चित्रः :-**

---

विग्रहस्य पुरतः, पृष्टतः, सर्वत्र अवयवः सुन्दररूपेण निर्माणं कुर्वन्ति चेत् तद् पूर्णचित्रः इति कथ्यते।।

**२) अर्थचित्रः :-**

---

विग्रहस्य पुरतः एव सर्वावयवः सौन्दर्यरूपेण निर्माणं कृत्वा, पृष्ठभागे किमपि अवयवः नास्ति चेत् तद् अर्थचित्रः भवति।।

**३) चित्राऽभासः :-**

---

भित्तिः उपरि श्वेत, कृष्ण इत्यादि वर्णेन (अथवाः शिलायाः उपरि स्पष्टतया, अस्पष्टतया दृश्यते चेत् तद् चित्राऽभासः इति कथ्यते।।

**आलयनिर्माणभेदाः - तत्फलम् :-**

a) भगवदालयः शिलायां निर्माणं करोति चेत् - श्रेष्ट फलम्।।
b) भगवदालयः अष्टकां निर्माणं करोति चेत् - मध्यम फलम्।।
c) भगवदालयः (मृत्तिकां स्वी) दारुं स्वीकृत्य निर्माणं करोति चेत् - अथम फलम् ।।

d) भगवदालयः मृत्तिकां स्वीकृत्य निर्माणं करोति चेत् - अथमाऽथम फलम्।।

**शिला शंकुः - शंकुलक्षणम् :-**

देवालयस्य मानांगुलप्रमाणेन शिलाशंकुः, गृहस्य मात्रांगुलप्रमाणेन दारुशंकुः शलक्षणरूपेण निर्माणं कृत्वा प्रतिष्ठा करणीयः ।। भगवदालयस्य स्थापनशंकुः त्रीणि भागानि कृत्वा अथोभागे चतुरस्राकारे, मध्ये अष्टकोणाकारे, उपरि कमलाकृतिः इव निर्माणः करणीयः।। तत् शंकुः गर्भमन्दिरस्य मध्यभागे "ॐ नमो नारायणाय" इति मूल मन्त्रेण स्थापनं करणीयः अष्ट दिग्भागेषु अष्ट शंकवः स्थापनीयः।।

**देवप्रतिष्ठा - शुभकालः :-**

सर्वदेवता प्रतिष्ठः उत्तरायणे आचरणीयः "शुक्लपक्षे - प्रतिपत्, द्वितीया, तृतीया, पञ्चमी, षष्ठी, सप्तमी, दशमी, एकादशी, द्वादशी, पूर्णिमा तिथयः ; कृष्णपक्षे - पञ्चमी, षष्ठी, सप्तमी, दशमी, एकादशी, द्वादशी, पूर्णिमा तिथयः श्रेष्ठः ।। अश्विनि, रोहिणी, पुनर्वसू, पुष्यमी, उत्तरफल्गुमी, उत्तराषाढा, उत्तराभाद्रा, हस्ता, श्रवण नक्षत्राणि देवप्रतिष्ठस्य शुभः।। नवग्रहेषु चन्द्र, बुध, गुरु, शुक्र, शुभः।। वृषभ, मिधुन, सिंह, कन्या, तुल, धनुः, कुम्भ राशयः शुभाः"।।

**सर्वशुभाणाम् त्याज्यकालः :-**

संवत्सरस्य अन्तिम पञ्चदशदिनानि, मासस्य अन्तिम त्रीणि दिनानि, नक्षत्रस्य अन्तिम द्विघडियाः, ग्रहणस्य पूर्वं परं सप्तदीनानि त्याज्यः।।

**अशुभ कालः :-**

श्रीमन्नारायणः क्षीरसमुद्रे शयनसमयः आषाढ शुक्लपक्ष एकादशी तिथिः आरभ्य कार्तीकमास शुक्लपक्ष एकादशी पर्यन्तं शुभकार्याणि न आचरणीयः।।

***

# १.१.ब्रह्मोत्सव प्रकरणम्

अध उत्सत्वारम्भः,यजमानस्सर्वदोषशान्त्यर्थं सर्वलोकशन्त्यर्थंच विष्णोरुत्सवं कारये दालयाभिमुखे दक्षिणेवाऽप्यन्यस्मिन् युक्तेदेशेवाऽऽस्थानमण्टपं कूटंवा पञ्छ हस्ताधिभेदेन प्राङ्मुखं दक्षिणामुख मालय द्वार -- दिङ्मुंवा परिकल्प्यतत्प्रमुखे द्वात्रिंशत्त्समादि शतस्तम्भान्तैस्त्सम्भैर्युक्तं वृत्तमण्टपंकूटं प्रपांवाकृत्वा, प्रपायां मध्ये वर्षनिवारणं कूटं युक्तितः करये त्तत्सर्वं वितानध्वजदर्भमाला तरङ्गपताक मुक्तादामाद्यैरलङ्कृत्य, द्वारेषुतोरण पूर्णकुम्भ कदलीक्रमुक दीपाङ्कुरै रलङ्कुर्यात्।।

**यानानि :-**

शिबिका, रधरङ्ग, डोलायन्त्र, मुखमण्टप, गज, तुरग, गरुड, सिंह, व्याल, हंस,भ्रमणादीनि यानानि शक्तितः कारयेत्।

**अन्यसामाग्री :-**

मालादेप यन्त्रदीप हन्तदीप शूलदीपान, भेरीपटहमर्दल गोमुख तालकाहल, मुरजवंशझर्घर, मंजुल दर्दुरशङ्ख श्रुंग धारा, वीणा वेणु झुल्लरीश्च शक्तितः कारयेत्।।

छत्राणि श्वेतानि नानाविधानि, पिञ्छान्यनेक विधानि, व्यजनानि चामराणि, विविधान् ध्वजात्प-ताकांश्च, वितानतरङ्गस्तम्भवेष्टनान्याहृत्य, यथोक्तं समित्पुष्प, दर्भहोमद्रव्य, बलिद्रव्य पुष्प, गन्थधूपदीपार्घ्य द्रव्यं नपवस्त्र, तन्तु, हेम, रत्न, धान्यतण्डुलघृत दधि क्षीराणि, दीपार्थं घृतं तैलं वाऽऽहरेत्, हविरर्थं तण्डुलं बहूपधंश गुडफलसहितं भक्तानां ब्राह्मणादीनां भोजनार्थानि यानि द्रव्यामि तानि सर्वाणिच सम्भरति। नर्तकान् गायकान् भक्तान् परिचारकांश्चयत्ने नाह्वयेत्।

**ग्रामालङ्करणम् :-**

तद्ग्रामवासिनः स्सर्वेऽनन्यतत्पराश्चालङ्कृता हर्षयुताश्चभवेयुस्तद्ग्रामवीधीश्च संशोध्यगृह-द्वाराणि दीपाङ्कुरोदकुम्भाद्यैरलङ्कृत्य देवालयं मृष्टसिक्तोपलेपनाद्यैस्संशोध्यपैष्ट्या भूमिमलङ्कृत्य लाजाक्षत कुसुमान्यवकीर्य, उत्सवं यद्दिनेकर्तुमुद्योगस्तद्दिनात्पूर्वं नवमे सप्तमे पञ्चमे तृतीयेवाऽह्नङ्कुरार्पणं कुर्यात्।

**यागशालो स्थाननिर्णयः. तल्लक्षणञ्च :-**

पश्चादालयाबिमुखे दक्षिणेवाऽग्नेय्यांवा यागशालांषोडशस्तम्भयुक्तां पञ्चहस्तादहीनां चतुर्द्वार युतामेकद्वारयुतांवा मण्टपं कूटं वा कारयति। तां तोरण पूर्णकुम्भवितान ध्वजदर्भमालाद्यैरलङ्कृत्य।

**कुम्भवेदिलक्षणम् :-**

तन्मध्येऽष्टतालायत विस्तारां चतुरश्रां द्वितालोत्सेधां कुम्भवेदिंच कृत्वा।

**अग्निकुण्डस्थाननिर्णयः :-**

तत्प्राच्यां पूर्ववत्सब्याग्निकृण्डं कृत्वोपलिव्यपैष्ट्याभूमिमलङ्कुर्यात्।

**उत्सवदिनसङ्ख्या विचारः :-**

श्लो। पक्षं त्रयोदशाहंवा दिनान्येकादश क्रमात्।
नवाहं तत्रसप्ताहं पञ्चाहं मथवा पुनः।।
त्रिदिनं द्विदिनंचैव एकाहं चाथवापुनः।
तत्रैव ध्वजमारोप्य नवाहं चोत्सवं चरेत्।।
उत्सवस्य दिनाददौवा घोषयेद्विधिपूर्वकम्।
घोषणाद्दिवसात्पूर्वं कारयेदङ्कुरार्पणम्।। (यज्ञाधिकारे).

**उत्सवेषूत्तमादिभेदः :-**

श्लो। उत्तमंतु त्रिसप्ताहं मध्यमंस्याच्चतुर्दश।
नवाहं वाऽथसप्ताह मथमं परिचक्षते।। (प्रकीर्णाधिकारे).

**अग्निकल्पनम् :-**

श्लो। कल्पयेद्यागशालाञ्च प्रतिष्टोक्तेन मार्गतः।
वेदिं तन्मध्यमे पङक्तापङ्क्तीमानेन कारयेत्।।
उत्सवाद्यर्थमात्रंवा रत्निमात्रोदयं क्रमात्।
पञ्चाग्नीन् कल्पयेद्दीमा नुत्तमेचोत्सवे तथा।।
त्रेताग्नीन्कल्पये द्विद्वान्मध्यमे चोत्सवे क्रमात्।
अथमं यदिचेत्सभ्यं कल्पयेत्पूर्ववत्सुधीः।।
त्रेताग्नि कल्पसं यत्र प्रधानं गार्हपत्यकम्।
उभयोरन्ययोस्सभ्यं प्रधानं चाचरेत्तथा।। (यज्ञधिकारे).

**उत्सवत्रैविध्यम् :-**

अथ देवेशस्योत्सव विंधिव्याख्यास्यामः, त्रिविध उत्सवोनित्योत्सव श्शान्त्युत्सवश्श्रद्धोत्सव इति। द्वादशमासेष्वेकस्मिन्मासेऽब्दं प्रति तत्काले नित्यं सङ्कल्प्य यः क्रियते सन्नित्योत्सवः। भय प्रमाद दुर्भिक्षव्याधि -ग्रहपीडाद्यशुभ शान्त्यर्थं सङ्कल्प्य यः क्रियते सनित्योत्सवः। श्रद्धावित्तेयदायुक्तेतदा यस्सम्यक्छद्धया क्रियतेन श्रद्धोत्सवो भवेत्।

**ध्वजदण्डिलक्षणम् :-**

ध्वजदण्डमृजुं कृमिकोटरहित मनुद्वेजनं विमानमंपादाधिकमर्थादिकं पादहीनमर्थहीनं वा चतुर्विं--शत्यङ्गुल परिणाहं यथालाभपरिणाहं वा, वेणुं जातिं चम्पकंक्रमुकंवाऽन्यशुभवृक्षसारं वा गृह्णीयादागस्त्यंवेति केचित्।

**ध्वजपटलक्षणम् :-**

ध्वजपटमहतं शुद्धं दृढं शुक्लंकार्पासतास्तपं सूक्ष्मं चतुर्दश त्रयोदश द्वादशैकादश दशवनवाष्ट सप्तषड्ढस्ताना मस्यतयमाऽयामं सप्तषट्स्च चतुस्ताल विस्तृतं वस्त्रद्वयं संयोज्यैकंवेति केचित्, केशादीन् परि -हृत्यजलेनशोधयित्वा, संशोष्याग्रेणाग्रं पुच्छेन पुच्छं कृत्वोर्थ्वभागे तत्पटविस्तारार्थायतं शूर्पाकारमग्रं कृत्वा पट-स्याथोभागे तद्विस्तारार्थायतविस्तारौ पादौ मध्यादापादान्तं क्रमात्कृशौ युक्तितः कृत्वाऽग्रादधः पादोर्थ्वेच तिर्यग्य -ष्टिं वैणवीमन्यैश्शुभवृक्षैर्वा, तत्पटविस्ताराऽयामामङ्गला ग्रहरीणाहिं योजयंति।

**पटलेख्य गरुडलक्षणम् :-**

एवं कृत ध्वजपटमध्ये गरुडं मूलबेरस्य बाहुसमं कर्णान्तं स्तनान्तं नाभ्यन्तंवाशुद्धद्वारसमं पादा -धिकमर्थाधिकं पादहीन मर्थहीनंवा गर्भगेवास्यार्थं त्रिपादं समंवा एतेष्विष्टमानेन नवतालविभगेनवा लेखयेत्।

**ध्वजयष्टि रज्ज्वादीनां लक्षणम् :-**

ध्वजदण्डायामं षड्भागं पञचभागं चतुर्भागंवा कृत्वैकांशां वैणवीं यष्टिं सङ्गृह्य दण्डाग्रे यज्ञोक्तवृक्षैरन्यैश्शुभैर्वाद्वितालाा यामानि तद्दण्डार्ह विस्ताराणि मध्ये छिद्रयुतानि यष्ट्याधाराणि त्रीणिसमाहृत्य, अचालनिसंयोजयेत्, तेषामग्रे यष्टियोजनार्थं सुषिरं कृत्वा दण्डाग्रे यमं यमद्वयंवा वैणवमधिकं यन्त्रवलयं कृत्वा, तत्रैकमाधारं तदद्श्चैकंतयोर्मध्येचैकं क्रमेणसं योज्यतद्यष्ट्यग्रेतिभागं द्विभागंवा हित्वायसत्रवलयं ताम्रेणाऽयसेस वाकृत्वा मङ्गलाग्रपरीणाहां त्रिवृतां तस्तुनारज्जुं कृत्वा संयोजयेद्दण्डं प्रक्षाल्य दर्भमालयावेष्टयेत्। (विमानार्चन कल्पे). ब्रह्मोत्सव विषये पुराणाः एवं कथयन्ति --

तत्राहूय मुनीन् सर्वान् महीपालान् यथाक्रमम्।
कन्यामासं गते भानौ द्वितीयायां जगत्पतेः।।

ध्वजारोहण माधाय सांकुरार्पाणमेव च।
वैखानसै र्मुनिश्रेष्ठैः पूजामंत्रैः प्रकल्पिता।।

नरयानं रत्नमयं निधाय पुरतो हरेः।
वासुदेवं बबाषेऽथ ब्रह्मलोकपितामहः।।

नरयानं समारुह्य कुरु चैत्य प्रदक्षिणम्।
एवमुक्तः प्रत्युवाच श्रीनिवासः पितामहाम्।।
श्रीवेंकटेश्वर ब्रह्मोत्सव वाहनक्रम, उत्सवक्रम विषये भविष्योत्तरपुराणे १४ अध्याये एवं कथितम्

तस्मिन् महोत्सवे विष्णोः  ध्वजारोहणवासरे।
प्रथमे प्रथमं यानं मनुष्यान्दोलिकाऽभवेत्।।

द्वितीयं च तथा रात्रा वभवच्छेषवाहनम्।
शेषे शयनशीलस्य शेषाचलवासिनः।।
सदा शेषप्रियस्यास्य श्रीनिवासस्य शार्ङ्गिणः।

द्वितीयदिवसे चाद्यं भूयोऽभूच्छेषवाहनम्।
द्वितीयं च तथा यानं रात्रावभव द्धंसवाहनम्।
तृतीयदिवसे चाद्य मभवत्सिंहवाहनम्।
द्वितीयं च तथा यानं रात्रौ मौक्तिक मण्डपम्।।

चतुर्थदिवसे यानं आदिमं कल्पभूरुहः।
द्वितीय मभव द्रात्रौ सर्वभूपालवाहनम्।।

पञ्चमे दिवसे चाद्यं यान मान्दोलिकाऽभवत्।
हरे रमृत संधायि मोहिनी वेषधारिणः।।

द्वितीयं रजनौ यानं वेदवेद्यस्य वै हरेः।
बभूव च स्वयं साक्षात् छंदोमूर्तिः खगेश्वरः।।

आद्यं यानं षष्ठदिने हनूमा नभवद्धरे।
द्वितीयं मंगलगिरिः सायं यान मभूद्धरेः।।
महिषी संयुतास्यास्य वसंतोत्सव रागिणः।।

तृतीयं रजनौ यानं आसीदैरावतोगजः.
सप्तमेऽभूद्दिवसे यान माद्यं भास्करमंडलम्।।

द्वितीयं मंगलगिरिः स्सायमासी द्रमापते।
रमणीयतमोद्यानविहारोत्सवरागिणः।।

कुसुमापचयव्यग्र महिषीजनशासिनः।
तृतीयं रजनौ यानः अभव च्चंद्रमंडलम्।।

अष्टमे दिवसे चाद्य मभवद्वाहनं हरेः।
नानाविधैरलंकारै र्मंडित स्सुमहान् रथः।।

द्वितीयं रजनौ यानं अभू दुच्चैःश्रवाह्वयः।
नवमे दिवसे चाद्यं यान मांदोलिकाऽभवत्।।
द्वितीयं मंगलगिरिः यान मासी द्रमापते।
हारिद्रैः पिंदलै श्चूर्णैः अभिषिक्तस्य मंदलैः।।

समुद्युक्तस्यावभृथस्नान मांगलिकोत्सवे।
स इत्थं मंगलै श्चूर्णै र्हारिद्रै रभिषेचितः।।

सुन्दर न्मंगलगिरिं समारुह्य सतां गतः।
चैत्यं प्रदक्षिणीकृत्य सहसर्वै र्महाजनैः।।

जपद्भि र्वैदिकान् मन्त्रान्  सहितश्च द्विजोत्तमैः।
चकारावभृथस्नानं भगवानादिपूरुषः।।

स्वामिपुष्करिणीतीर्थे सर्वलोकैकपावने।
अवतारदिने तस्मिन् नक्षत्रे श्रवणे प्रगे।।

तृतीयं मंगलगिरि र्यानं रात्रावभूत्ततः।
ध्वजावरोहणाभिख्यः उत्सवोऽभूत्तदा हरेः।।

ततोऽपरेद्यु रभवत् पुष्पयागमहोत्सवः।
देशान्तरादागतानां सपर्याऽऽसीत्ततो नृणाम्।।

देवा जग्मुस्स्वकं धाम राजानो राजसत्तम।
जग्मुस्स्वनगरं दिव्यं दृष्ट्वा देवमहोत्सवम्।।
ब्रह्मा जगाम स्वकं लोकं नत्वा वेंकटवल्लभम्।।

***

# १.२.कल्याणोत्सवः

तिरुमल श्रीवेङ्कटेश्वर स्वामिनः प्रचाल्यमानेषु ब्रह्मोत्सवादि प्रधानैककार्येषु कल्याणोत्सवः अन्यतमः भवति। विवहानन्तरं नूतनदम्पती इष्टकाम्यार्थ इष्टसिद्ध्यर्थं भगवतो श्रीवेङ्कटेश्वरस्य कल्याणोत्सवः प्रकुर्वन्ति। अतएव सः नित्यकल्याण  मूर्त्तित्वेन विराजते।

अयं च उत्सवः धार्मिकः आद्यात्मिकोत्सवरूपेण प्रचाल्यते। श्रीनिवास कल्याणोत्सवस्तु न केवल आगमे अपि च बहुषु पुराणेषु सुप्रतिपादितोऽरित्त।

कल्यं सुखं अणयति प्रणयति इति कल्याणम्। सुखं दापयति इति कल्याण शब्दस्य सामान्यार्थः। परिणयं उदाह, पाणिग्रहणं, पाणिपीडनं, पाणिबन्धं दारोपग्रहणं दारप्रतिग्रहणं, दारकर्म, दारक्रिया, इत्यादीनि कल्याणस्य पर्यायपदानि भवन्ति। वैयक्तिक विवाहेन स्वकुदुम्बस्य मङ्गलकरं भवति। परन्तु देवालयेषु स्व स्व आगमोक्तानुसारेण प्रचाल्यमान कल्याणोत्सवेन समाजस्य श्रेयेर्वृद्धि भवति।

देवानां विवाहप्रकरणे कल्याण शब्दः एव आगमेषु उपयुज्यते। एवं गौरीकल्याणं सीतारामकल्याणं, रूक्मणीकल्याणं इति लोके श्रूयते तिरुमलायां श्रीनिवासस्य देवालये ध्वजस्तम्बमण्डपे पद्मावतीश्रीनिवास कल्याणोत्सव शिल्पं दृश्यते। पदकविता पितामहेन अन्नमाचार्येण तिरुमलायां प्रचाल्यमानानां सर्वेषां अत्सवानां कृतमिति। तेन श्रीनिवास कल्याणोत्सव विशेषेण प्रकीर्तितवान्।

श्रीनिवासकल्याणोत्सवं निर्विहेतेन परिमाप्त्यर्थं अर्चकाः विष्कसेन पूजां अथवा गणपति पूजां कुर्वन्ति उक्तं च आगमे।

विष्कसेन  सकलविबुधप्रौदसैन्याधिनायं मुदाचक्रे करतलयुशे शङ्खदण्डौ गधानम् मेधश्मामं सुप्रणिमुकुटं पीतवस्त्रे शुभागम् ध्यायेद्देवं विजितदनुजं सूत्रोत्त्या सुमेतम्। एवं विष्कसेन आर्चनानन्तरं पुण्याहं शुद्द्यर्थं वृद्द्यर्थं शान्त्यर्धं अभ्युदयार्थञ्च वाचयन्ति।

स्वस्तिपुण्याहवाचनानन्तरं कन्यावरणं भवति। शुभक्षणांन्वितां कन्यां अन्विषयन्तुं इति वरः वदति। तदनुसारेण गृहस्याः तत्कर्मं कुर्वन्ति। इदमेव कन्यावरणम् श्त्भुच्यते। स्वामिनः संकल्पानन्तरं अर्चकाः

"भगवदर्थं लक्ष्मी वृणीध्वम्
लक्ष्म्यर्थं हरिं वृणीध्वम्
भगवदर्थं महीं वृणीध्वम्
मह्यर्थं हरिं वृणीध्वम्"

एवं प्रकारेण वरवध्वोः अङ्गीकारं सूचयन्ति। कन्यावरणानन्तरं पुष्पमालिका समर्पणं कार्यक्रमेऽस्मिन् प्रथमोभागः गोत्रोच्यारणं भवति। एवं अर्चकाः श्री महाविष्णोः गोत्रं लक्ष्मीदेव्यास्य गोत्रं समुच्चरन् लोककल्याणार्थं इमं कन्यां प्रतिगृह्यमिति वदन्ति।

**श्रीदेव्याः गोत्रम्**

अचिन्त्याद्भुजनित्यभौवनस्वभावलावण्य रत्नाकराय
अरिवललोकपवित्रगात्रय। श्रीमहाविष्णवे वराय भृगो,
संकल्पतनयां भागविगोत्रजां श्रीदेवीनाम्नीं इमां कन्यां
लोककल्याणार्थं वृणीमहे नारायणाय वराय श्रीदेवीनाम्नी इमां कन्यां दास्यामि।

**भूदेव्याः गोत्रम्**

अचिन्त्यादभूतनित्ययौवन स्वभावलावण्य रत्नाकराय अरिवललोकपवित्रगोत्राय श्रीमहाविष्णवे वराय कश्यपप्रजापते सकल्पतनयां काश्यपगोत्रजां महीदंवी नाम्नी इमां कन्यां लोककल्याणार्थं वृणीमहे। आदिनारायणाय वराय महीदेवी नाम्नी इमां कन्यां दास्यामि।

सामान्य मनुष्याणां तु गोत्रप्रवरादिकं भवति। परन्तु आखिवलकोटि ब्रह्माण्ड नायकस्य महाविष्णोः गोत्रादयः न सन्ति। लक्ष्मी भृगु महर्षे संकल्प तनयां भार्गवगोत्राजां परं पुराणेव भगवान् श्रीनिवासः भारद्वाजगोत्रोत्पलः इति प्रतिपादयति। ततः मधूपर्कपूजा अर्थात् दधिमधुप्राशनम् वरस्य पादप्रक्षालनं अहर्यं पाद्यं आचमनानि च भवन्ति। विवाह दीक्षार्थं कौतुकबन्धनं प्रतिसम्बधनं कुर्भात्। तदा स्वस्ति सूक्तं पठन्ति अनन्तरं मङ्गलाष्टकं महाकुपं कल्पपूर्वकं प्रवरोच्चारणसहितं अक्षतैः सुवर्णेनतोयधासया च कन्यादानं कुर्यात्।
हैन्दवविवाहेषु

माङ्गल्यधारणं प्रधानक्रिया भवति। तत्र सकल मङ्गलानां शुभानां प्रतिरूपकं सूत्रं मङ्गलसूत्रं भवति। तत्र प्रजापतिस्सोम राजा समसृजनतनन्त्रयोः वेदाः अन्वसृजन्त तान् हन्ते कुरन्त अधह सीता सवित्री अयं प्रधानमन्त्रः भवति। मङ्गलसूत्रं धारणानन्तरं भगवतः सुवर्णयज्ञोपवीत समर्पणं "यज्ञोपवीतं परमं पवित्रं" इति मन्त्रेण कुर्यात्। ततः मौक्तिकः वधूवरयोः परस्परं अक्षतारोपणं च आचरेत्।

* * * * *

## २. संक्रान्ति निर्णयः

अथसंक्रान्तिनिर्णयउच्यते मेषेसूर्यसंक्रांतौप्रागूर्ध्वच पंचदशपंचदशघटिकाः पुण्यकालः दशदशेत्येके वृषेपूर्वाः षोडश मिथुनेपराः षोडश कर्केपूर्वास्त्रिंशत् सिंहेपूर्वाषोडश कन्यायांपराः षोडश तुलायां प्रागूर्ध्वचपंचदशपंचदश दशदशेत्येके वृश्चिकेपूर्वाः षोडश मकरेपराश्चत्वारिंशत् कुंभेपूर्वाः षोढश मीनेपराः षोडश घटिकाद्वयाद्यल्पादिनशेषेमिथुनकन्याधनुर्मीनेष्वपिमकरेपि पूर्वाएवपुण्याः प्रभातेघटिकाद्वयाद्यल्पकालेवृषसिंहवृश्चिक कुभेष्वपिकर्केपिपरा एव पुण्याः प्रभातेकर्कसंक्रांतौ पूर्वदिन पुण्यमित्येके रात्रौसंक्रमेमध्य रात्रादर्वाक्संक्रांतौ पूर्वदिनोत्तरार्धं पुण्यम् मध्यरात्रात्परतः संक्रांतौपरदिनस्य पूर्वार्धपुण्यं निशीथमध्यएवसंक्रांतोदिनद्वयेपि पूर्वदिनोत्तरार्धपरदिन पूर्वार्धचपुण्यम् इदंमकरकर्कातिरिक्तेसर्वत्र रात्रि संक्रमेज्ञेयम् अयनेतुमकरेरात्रिसंक्रमेसर्वत्र-परदिनमेवपुण्यम् रात्रौकर्कसंक्रांतौ पूर्वदिनमेवपुण्यं सूर्यास्तोत्तर घटिकात्रयं सायं संद्या तत्रमकर संक्रमे पूर्वदिने पुण्यम् सूर्योदयात् प्राक् घटिकात्रयं प्रातः संध्या तत्र कर्क संक्रांतो परदिने पुण्यमिति संध्याकालेविशेषोज्योतिः शास्त्रेप्रसिद्धः ।

अथदानम् मेषेमेषदानम् वृषेगोदानम् मिथुनेवस्त्रान्नादिदेयम् कर्केघृतधेनुः छत्रंसुवर्णचसिंहे कन्यायां गृहंवस्त्रंच तुलायांतिलागोरसाश्चदेयाः एवमन्यान्यपिदानानिद्रष्टव्यानि । अयनसंक्रांतौ मेषुतुलासंक्रांतौचपूर्वत्रिरात्रमेकरात्रं वोपोष्यस्नानदानादिकार्यम् चरमोपोषणं संक्रांतिमत्यहोरात्रेपुण्यकालवत्यहोरात्रेवायथापतेत्तथाकार्यम् अयमुपवासः पुत्रवन्दृहस्थभिन्नेनपापक्ष्यकामेनकार्यः काम्योनतुनित्यः सर्वसंक्रांतिषुपिण्डरहितं श्राद्धं कार्यम् अयनद्वयेतुनित्यम यथातत्तत्संक्रांतिषुदानादिकं कर्तव्यं तथैवताभ्यः पूर्वमयनांश प्रवृत्तौतत्तत्संक्रांत्युचित स्नानदानादिकं कर्तव्यं, अयनांशाज्योतिः शास्त्रेप्रसिद्धाः तेचेदानींद्वादशाधिकसप्तदशशतसंख्याकेशालिवाहनशके एकविंशतिरयनांशा इत्येकविंशतितमेदिने पूर्वमयनांशपर्वका इलतिपर्यवसन्नोर्थत्रः एवंन्यूनाधिकशके ऊध्यम् वृषसिंह वृश्चिककुंभेषु संक्रांतिर्विष्णुपदसंज्ञामिथुनकन्याधनुर्मीनेषुसंक्रांतिः षडशीतिसंज्ञा मेषतुलयोर्विषुवसंज्ञा कर्कमकरयोरयनसंज्ञा एतासुचतुर्विधासु उत्तरोत्तरं पुण्याधिक्यं मंगलकृत्येषुसर्वसंक्रान्तिष्वपिविशेषेण पूर्वतः परतश्च षोडशषोडशघटिकास्त्याज्याः चंद्रादि संक्रांतिषुपूर्वत्र परत्रचमिलित्वा क्रमेण द्वेनवद्वेचतुरशीतिः षट् सार्धशतंच

घटिकास्त्याज्याः रात्रौ संक्रमणे ग्रहणवद्रात्रावेवस्नानदानादिकं कर्तव्यमिति केचित् रात्रौसंक्रमणेपिदिवैवस्नानादिकं न तु रात्रावितितुसर्वसंमतं बहुदेशाचारश्चैवम् यस्यजन्मर्क्षेरविसंक्रमस्तस्य धनक्षयादि पीडा तत्परिहारार्थेपद्मपत्रादि युक्त जलेन स्नानम् विषुवायनयोरद्विसंक्रमे पूर्वपरात्रौतदह्निचाध्यापनाध्ययने वर्जयेत् रात्रिसंक्रमणेपूर्वापरदिनयोस्तद्रात्रौ वर्जयेत् एवं पक्षिणी संक्रांतिः द्वादशप्रहरपर्यतमनध्यायादिकमितितात्पर्यम् अन्योपिविशेषोऽयनसंक्रांतौवक्ष्यते इति संक्रांत्युद्धेशोद्वितीयः ।।

### ३.१.द्वादशभावविचारः.

फलितज्योतिषशास्त्रस्य आधारभूतेषु मुख्यांशेषु अन्यतमोऽयं भावविचारः। भावगणना लग्नादारभ्यते। तथा भावाः द्वादशाः भवन्ति। एकैकेन भावेन किं किं चिन्त्येत इति मानसागरीग्रन्थे प्रोक्तं विद्यते। ततः ----

प्रथमभावः :-

रूपं तथा वर्णविनिर्णयञ्च चिह्नानि जातिर्वयसः प्रमाणम्।
सुखानिदुःखान्यपि साहसञ्च लग्ने विलोक्यं खलु सर्वमेतत्।।

प्रथमभावेन रूपं, शरीरवर्णं, शरीरस्थचिह्नानि, जातिः, सुखं, दुःखं च विचिन्त्यते।

द्वितीयभावः :-

स्वर्णादिधातुः क्रयविक्रयश्च रत्नानिकाशापि च सङ्गहश्च।
एतत्समस्तं परिचिन्तनीयं धनाभिधाने भवने सुधीभिः।।

तृतीयभावः :-

सहोदराणां अथ किङ्कराणां पराक्रमाणा मुपजीविनाञ्च।
विचारणा जातकशास्त्रविद्भिः तृतीयभावे विनयेव कार्याः।।

चतुर्थभावः :-

मातासह्वद्भातुलभागिनेयाः क्षेत्रं सुखं वाहनमासनश्च.
लालित्यमभ्यः शयनस्य वृद्धिः पश्वादिकं वेश्यगृहाच्चतुर्थात्।।

पञ्चमभावः :-

बुद्धिः प्रबन्धात्मजमन्त्रविद्या विनेयगर्भस्थितिनीतिसंस्थाः।
सुताभिधाने भुवने नराणां होरागमज्ञैः परिचिन्तनीयम्।।

षष्ठभावः :-

वैरिव्रातक्रूरकर्मायमानां चिन्ता शङ्का मातुलानां विचारः।
होरापारावारपारं प्रयातैरेतत्सर्वं शत्रुभावे विचिन्त्यम्।।

सप्तमभावः :-

रणाङ्कणं चापि वणिक्रियाश्च जायाविचारो गमनप्रमाणम्।
शास्त्रप्रवीणेन विचारणीयं कलत्रभावे किलसर्वमेतत्।।

अष्टमभावः :-

नद्युत्तरात् पान्थवैषम्यदुर्गं शस्त्रं चायुः सङ्कश्चेति सर्वम्।
रन्ध्रस्थाने सर्वथा कल्पनीयं प्राचीनानामाज्ञया जातकज्ञैः।।

नवमभावः :-

धर्मक्रियायांहि मनःप्रवृत्तिर्भाग्योपपत्तिर्विमलं च शीलम्।
तीर्थप्रयाणं प्रणयः पुराणैः पुण्यालये सर्वमिदं प्रदिष्टम्।।

दशमभावः :-

व्यापारमुद्रा नृपमान्यराज्यं प्रयोजनं चापि पितुस्तथैव।

महत्फलाप्तिः खलु सर्वमेतद्राज्याभिधाने भवने विचार्यम्।।

एकादशभावः :-

अभीष्टलाभं खलु सर्वमेतत् सुतास्समस्ताखलु पूर्वजांश्च।
लाभः किलैषामखिलं विचार्यमेतन्तुलाभस्यगृहेग्रहज्ञैः।।

द्वादशभावः :-

पापं व्ययञ्च पतनं नरकं वामलोचनम्।
स्थानभ्रंशश्च वैकल्यं द्वादशेन विचिन्ययेत्।।

इत्येवं भावैश्चिन्त्यानि। अथ एकेकोग्रहाः एकैकस्मिन् भावे तिष्ठति चेत् किं फलं इति बृहज्जातक -रीत्या लिख्यते ----

लग्नगतस्यद्वितीयगतस्य च आदित्यस्य फलं :-

शूरस्तब्दो विकलनयनो निर्घ्रणोर्के तनुस्थे
मेषे स्वस्वस्तिमिरनयनः सिंहसंस्थे निशान्धः।
नीचेन्धोस्वः शशिगृहगते बुद्बुदाक्षः पतंगे
भूरिद्रव्योनृपहृतधनो वक्त्ररौगीद्वितीये।।

लग्ने सूर्ये अस्ति चेत् शूरः,स्तब्दः, विकलनेत्रं, दयारहितः च भवन्ति। मेषे लग्ने रविश्चेत् नेत्र -रोगी, धनवान् च भवति। सिंहलग्ने रविः चेत् निशान्धः भवति। तुलालग्ने रविश्चेत् निर्धनान्धश्च भवति। कर्काटके रविः चेत् बुद्बुदाक्षः भवति। लग्नात् द्वितीये रविः भवति चेत् धनवान् भवति किन्तु तद्धनं राजा अपहरति तथा वक्त्ररोगी च भवति।

तृतीयभावात् षष्ठभावपर्यन्तं रविः :-

मतिविक्रमवां स्तृतीयगेर्के विसुखत्रः पीजितमानसः चतुर्त्थे।
असुतो धनवर्ज्जितस्त्रिकोणे बलवान् शत्रुजितश्चशत्रुयाते।।

सप्तमात् द्वादशपर्यन्तं सूर्यस्थितफलम् :-

स्त्रीभिर्गतः परिभवं मदगे पतंगे
स्वल्पात्मजो निधनगे विकलेक्षणश्च।
धर्मेसुतार्त्थसुखमाक् श्रुतशौर्थभाक्खे
लाभेप्रमृत धनवान् पतितस्तुरिफे।।

चन्द्रः लग्नात् षष्ठपर्यन्तम् :-

मूकोन्मत्तजलान्धनीचबधिर प्रेष्यः शशाङ्कोदये
स्वर्क्षाजोच्चगते धनी बहुसुतः स्वस्वः कुडुम्बी धने।
हिंस्रोभ्रातृगते सुखे सतनये तप्रोक्तभावान्वितो
नैकारिर्मुदुकायवह्निमदन स्तीक्ष्णेलसच्चारिणे।।

मङ्गलभावाश्रयफलम् - बुधस्य च :-

लग्ने कुजेक्षततनुर्धनगेकदन्नो
धर्मेद्यवान् दिनकरप्रतिमोन्यसंस्थः।
विद्वान् धनी प्रबलपण्डित मन्त्यशत्रुः
नर्मज्ञविश्रुतगुणाः परतोर्कवत् ज्ञे।।

लग्नस्थे कुजे ज्ञततनुः भवति। द्वितीये चेत् निन्धान्नभुक्, नवमे चेत् पापी च भवति। अन्यत्र सर्वत्र दिनकरवत्फलं भवति। लग्नगते बुधे पण्डितः भवति। द्वितीये धनी, तृतीये प्रबलः, चतुर्थे पण्डितः, पञ्चमे मन्त्री, षष्ठे शतृरहितः, सप्तमे नर्मज्ञः, अष्टमे विश्रुतगुणाश्च भवति।

जीवभावफलम् :-

विद्वान् सुवाक्यकृपयः सुखी च धीमानशत्रुः पितृतोधिकश्च।
नीचस्तपस्वी सधनः सलाभो खलश्चजीवे क्रमशोविलग्नात्।।

लग्नेगुरुश्चेत् विद्वान्, द्वितीये सुक्चनः, तृतीये कृपणः, चतुर्थे सुखी, पञ्चमे मतिमान्, षष्ठे शत्रुरहितः, सप्तमे पितृरधिकगगुणान्वितः, अष्टमे नीचः, नवमे तपस्वी, दशमे धनी, एकादशे लाभी, व्यथे क्रूरश्च भवति।

शुक्रभावफलम् :-

स्मरनिपुणः सुखितश्चविलग्ने
प्रियकलद्येस्तगते सुतरेप्सुः।
तनयगते सुखितो भृगुपुत्रे
गुरुवदतोन्यहे सधनोन्त्ये।।

लग्नगते शुक्रे कामकलानिपुणः सुखी च भवति। सप्तमे चेत् कलहप्रियः सुरताभिलाषी च, पञ्चमे सुखी, व्यधे सधनी च भवति। अन्यत्र गुरुवत्।

शनेः भावफलम् :-

अदृष्टार्त्थोरोगी मदनवशगोत्यन्तमलिनः
शिशुवे पीडार्तः सवितृसुतलग्नेत्यलसवाक्।
गुरुस्वर्क्षोच्चस्थे नृपतिसदृशो ग्रामपुरपः
सुविद्वांश्चार्वा गोदिनकरसमोन्यत्रकथितः।।

यदि तुलाधनुर्मीनमकरकुम्भराशिषु अन्यतमे लग्ने शनिः चेत् जातकः निर्धनः भवति। रोगी, कामातुराः, अत्यन्तमलिनः, बाल्ये रोगी, अस्पष्टभाषी भवति। तुलाधनुर्मकरकुम्भमीनेषु चेत् राजसदृशः, ग्राम प्रमुखः, विद्वान् सुन्दरश्च भवति। अन्यत्र शनेः फलम् सूर्यवत्।। इति द्वादशभावविचारः समाप्तः.

## ४.गृहवास्तु

### १.भूपरीक्षा.

भारतीय संस्कृतिः महिमान्विता उत्तमोत्तमा च भवति। भारतीय संस्कृतौ देवालयः बहवः भवति। एतेषां देवालयानां वैशिष्ट्यं महत्वपूर्णं भवति। एतादृशानां देवालययानां तथैव गृहाणां च निर्माणार्थं प्रदेशः स्थलम् कथं भवति। कीदृशस्थलेषु देवालय गृहनिर्माणं च कर्तव्यं तत्रस्थ पृथिवी कथं भवितव्या इत्यादि अनेके विषयाः भूपरीक्षा प्रकरणे चर्चिताः भवन्ति।

आलयभूपरीक्षादि समारम्भकालात् पूर्वस्मिन् यजमानः आचार्यं सर्वकार्योपदेशकं स्वसूत्रेक्तविधिना संस्कारैः संस्कृतं विप्रं, वेदविदं, नित्यस्वाध्याययुक्तं, गृहस्थं (पत्नीसहितं), दयादिगुणैर्युक्तं, शुभलक्षणैर्युक्तं, भू-परीक्षादिर्मार्गज्ञं, ज्ञानयोगविदं, जितेन्द्रियं, नित्यध्यानपरं, निश्चलं, नित्यार्चनापरं, विप्रं, भक्तिमत्तमेकं वरयित्वा अभिवन्द्य संपूज्य याचयेत्। आचार्यो यजमानेन भूमिं सम्यक्परीक्षयेत्।यथेष्टमासे शुक्लपक्षे कृष्णपक्षे त्रिधाद्यके वा भूपरीक्षां कारयेत्।

आलयगृहनिर्माणार्थं स्वीक्रियमाना पृथिवी बाध्यलक्षणैः शब्दरपर्शरूपरसगन्धादिभिः युक्ता भवितव्या। तथैव भूमिः दृढत्वविषये सुलक्षणविषये ज्ञातुमस्माकं प्राचीनैः महर्षिभिः भूपरीक्षाविधानं कथितं वर्तते।

प्रथमपद्धतिः–

करप्रमाणं कुर्वीत खातं तद्भूमिमध्यगम्।
तत्स्तन्मृदमाकृष्य तत्तथैवानुपूरयेत्।।

भूमेः मध्यभागे हस्तप्रमाणं गर्तं कृत्वा तथैव पुनः तथा मृत्तिकया गर्तस्य पूरणं कर्तव्यम्।

खातादिक मृदुत्ताः भूमिः श्रेष्टमध्यग तत्समा।
प्रगिण खातमृतक्षोणी हीणा शस्तानाशानृणाम्।।
गर्तस्य पूरणेन यदि मृदु अवशिष्यते।।

गर्तापेक्षया मदधिकं भवति चेत् सा भूमिः उत्तमा परिगण्यते। पूरणेन मृदु यदि गर्तसमानं भवति चेत् सा भूमिः अधमाभूमिरिति उच्यते। अधमभूमिः नैव स्वीकार्या। उत्तमभूमिः अथवा मध्यमभूमिः गृहनिर्माणार्थं योग्या भवति। तथैव अपराजितपृच्छे अपि उदितं भवति।

हस्तमात्रं खनेत्भूमिं तस्यान्तघृतपांशुकम्।
ततः खातं समासोध्य पूरयेत्पांशुनावृतम्।।
अधिकेपांशुके श्रेष्ठा मध्यमासमा पांशुके।
हीनपांशौ कनिष्टा च ज्योष्ठामध्याधमा त्रिधा।।

विश्वकर्मप्रकाशिकायाम् —

निखिनेद्धस्तमात्रेण पुनस्तेनैव पूरयेत्।
पांशुनाधिकमध्येमेणा श्रेष्ठा मध्यमाधमक्रमात्।।

काश्यपशिल्पनामक ग्रन्थे —

हस्तमात्रः ततः खात्वा खात्वा तद्भूमिमध्यमे।
पूरिते तन्मृदे खातेमधिका चोत्तमा मही।।
समायामध्यमाख्याता हीना सा कन्यपास्मृता।

एतेषां सर्वेषां ग्रन्थानां भवस्तु एकएवेति एतैः श्लोकैः ज्ञायते। अयं प्रथमपद्धतिः भवति।।

द्वितीयपद्धतिः —

भृत्वद्धिः खातमापूर्णे तस्मिन् पदशतं व्रजेत्।
तावच्चेदागमेंभः स्यात्तदाभूः सार्वकामिनी।।
मध्यमात्र प्रहीणोस्यात्ततोहीनेतरेधमा।।

एवं रीत्या हस्तप्रमाणं खातं खनित्वा तं खातं जलेन पूरयित्वा ततः शतपदपरिमाण दूरं गत्वा आगन्तव्यम्। आगमनान्तरं जलं यदि गर्तस्य पूर्णं भवति तर्हि सा भूमिः श्रेष्ठा इति कथ्यते। यदि जलं गर्तस्य सार्धभागं भवति तर्हि साभूमिः मध्यमभूमिरिति। यदि जलं गर्ते अर्धभागऽपेक्षया न्यूनं भवति अथवा संपूर्ण जला भावः तर्हि सा भूमिः अधमभूमिः इति उच्यते। इयं भूमिः निन्द्यभूमिं, गृहनिर्माणार्थं योग्या न भवति।।

तथैव अपराजितपृच्छग्रन्थे अपि उक्तं भवति —–

खातं तत्रोदकैर्भूत्वा शिल्पी शतपदंव्रजेत्।
अर्दे समे च पादोन कनिष्ठोत्तममध्यमाः।।

तृतीयपद्धतिः —

खातेसितादिमान्यानि अस्यां निश्युषितानि च।
यद्वर्णानि न शुष्यन्ति खातद्वर्णेष्टदामही।।

हस्तप्रमाणगर्तस्य उत्तरदिशि चतुर्षु दिक्षु क्रमेण श्वेत-रक्त-पीत-कालवर्णयुक्तपुष्तमालान् रात्रौ संस्थाप्य सूर्योदयानन्तरं श्वेतपुष्पमाला न शुष्यति चेत् सा भूमिः ब्राह्मणानां कृत् श्रेष्ठा भवति। रक्तवर्ण पुष्पमाला न शुष्यति चेत् सा भूमिः क्षत्रियाणां श्रेष्ठा स्यात्। पीतवर्णपुष्पमाला यदि न शुष्यति सी भूमिः वैश्यानां श्रेष्ठा इति। कालवर्ण पुष्पमाला यदि न शुष्यति तर्हि सा भूमिः शूद्राणां श्रेष्ठा इति उदितं वर्तते।।

अनया परीक्षया रात्रिसमये विद्यमना शीतउष्णस्थितिः तथैव भूगर्भे विद्यमान सहज शीतोष्ण

स्थितिश्च ज्ञातुं शक्यते। इयं तु तृतीयपद्धतिः।।

चतुर्थपद्धतिः --

खातस्योदक्प्रभृतिषु दिक्षु प्रज्वार्लस्तव।
दीपोयस्यां चिरतिष्ठे तद्वर्णेष्टप्रदाहिसाः।।

गर्तस्य चतुर्षुदिक्षु दीपान् संस्थाप्य यदि उत्तरदिशि विद्यमानः दीपः अधिकसमयं तिष्ठति सा भूमिः ब्राह्मणानां श्रेष्ठा भवति। प्राक्दिशि विद्यमानः दीपः अधिककालं तिष्ठति चेत् सा भूमिः क्षत्रियाणां श्रेष्ठा भवति दक्षिणदिशि विद्यमानः दीपः अधिकसमयं तिष्ठति चेत् सा भूमिः वैश्यानां श्रेष्ठा भवति। पश्चिमदिशि विद्यमानः दीपः अधिकसमयं तिष्ठति चेत् सा भूमिः शूद्राणां श्रेष्ठा इति चतुर्थपद्धतिः।।

## २.भूकर्षणम्

हले सचालयेद्वास्तुदगोष्टं तत्र तु कारयेत्। गोमूत्रगोमयाभ्यां च वास्तु भवे वम्। शोधयेद्वास्तु पर्यन्तं गृहस्थानां प्रयत्नतः।तदा तत्र गृहकुर्याद्वासयोग्यञ्च सौख्यकृत्। अप्रशस्तं स्थलं हलेः कर्षयित्वा तस्मिन् स्थले गोरक्षणं कर्तव्यम्। गोमयेन गोमूत्रेण च भूमेः शुद्धिः कर्तव्या। एवं यावत् स्थले गृहनिर्माणार्थं स्वीक्रियते। तावत्स्थलं सम्पूर्णगोमयगोमूत्राभ्यां शुद्धिः करणीया। एवं शुद्धिं कृत्वा गृहनिर्माणं यः करोति सः सुखं प्राप्नेति।

कृष्णवातां कपिलैर्वृष्टिः च बहुशः कृत्वा हलाद्यैः नवैः शचायौ च नवांवशे भूविवयेत् धान्यानि तन्मत्र -कैश्च। अद्भिस्तान्यभिसेचयेत् परितः सैरक्ष्य संवर्धये। दापुष्पाफलमत्रतानि पशुभिः संभक्षयेदाट्यति। भूयस्तत्रं विधाय गोनिवसनं नीत्वा च संवत्सरम्। मृद्भ्यादीनि पुनश्च तत्रनिवसेद्धान्यानि पूर्वक्रमात् भूतस्तान्यपि भक्षलेच्च पशुभिः शुद्धे मुहूर्ते तदा श्वात्वाशन्यविमौचितामतिदृढाषिदध्याज्भहीम्।। अप्रशस्थस्थलात्शल्य दन्त - केश - अश्म वल्मीकादि दुषितरथलात् हलैः कर्षयित्वा समन्त्रैः धान्यान् आरोत्य तत्रोत्पन्नतृणं गवां दत्वा आनन्तरं गाः तस्मिन्नेव स्थले रक्षयित्वा तत्रस्थमृत्तिकां निष्काष्य नूतनमृत्तिकया पूरयित्वा दृढभूमिं च कृत्वा अनन्तरं गृहादि निर्माणं कर्तव्यम्। इति भूशोधनम्।।

## ३.क्षेत्रार्वणम्

मध्येग्रामस्य गोद्वन्द्वनक्रसिंहाख्यराशयः।
मीनालिकन्यायाः पूर्वे दक्षिणे कर्कराशि च।।
धन्विनः पश्चिमे मेषातुलाकुम्भस्ततोत्तरे।
नोवलोयुर्नराः सौख्यधनलाभात्मजाद्दिनः।।

नराकृति चक्रम् :-

मस्तके पञ्चलाभाय मुखे त्रीणि धनक्षयः।
कुक्षे पञ्चधनं धान्यं षट्पादे स्त्री दरिद्रता।।
पृष्टौ चैकं पादहानिर्नाभौ चत्वारि संपदः।
गुह्ये चैक करे पीडा हस्ते चैकन्तुकं धनम्।।
वामे चैकं करे भेदो ग्रामचक्रं नराकृतिः।
गणयेज्जन्मनक्षत्रं नामनक्षत्रस्सदा।।

| अवयवः | नक्षत्राणि | दिक् | फलितम्. |
|---|---|---|---|
| १. ललाटः. | ग्रामनाम नक्षत्रतः ५ नक्षत्राणि. | पूर्वः. | लाभप्रदः. |
| २. मुखम्. | ग्रामनाम नक्षत्रतः ३ नक्षत्राणि. | आग्नेयः. | धनक्षयः. |
| ३. कुक्षिः. | ग्रामनाम नक्षत्रतः ५ नक्षत्राणि. | दक्षिणः. | धान्यवृद्धिः. |
| ४. पादाः. | ग्रामनाम नक्षत्रतः ६ नक्षत्राणि. | नैऋतिः. | भार्यायाः व्याधिः. |
| ५.पृष्टभागः. | ग्रामनाम नक्षत्रतः १ नक्षत्राम् | पश्चिमः. | पाहरोगः. |

| | | | |
|---|---|---|---|
| ६. नाभिः. | ग्रामनाम नक्षत्रतः ४ नक्षत्राणि. | वायव्यः. | सर्वसम्पदः. |
| ७. गुह्यः. | ग्रामनाम नक्षत्रतः १ नक्षत्राम् | उत्तरम्. | भयप्रदः. |
| ८. दक्षिणहस्तः. | ग्रामनाम नक्षत्रतः १ नक्षत्राम् | ईशान्यम्. | धनवृद्धिः. |
| ९. वामहस्तः. | ग्रामनाम नक्षत्रतः १ नक्षत्राम् | ग्राममध्यम्. | दुःखम्. |

४. निन्द्यभूलक्षणम्

चतुरस्त्रां द्विप्राकारां सिंहक्षाश्वेभरूपिणीम्।
वृत्तं च भद्रपीठं च त्रिशूलं लिंगसन्निभम्।।
प्रासादध्वजकुम्भादिः देवानामपि दुर्लभम्।।

चतुरस्त्राकारभूमिः, गजाकारभूमिः, सिंहवृषभाश्वरूपिणीभूमिः, वृत्ताकारभूमिः, भद्रपीठाकारभूमिः, त्रिशूल - लिंग - ध्वज - कुम्भकाराः वसुन्धरा देवातानामपि दुर्लभम् एतादृशी भूमी प्रशस्ता। एवमत्र द्वादश विध भूलक्षणमुक्तम्।

त्रिकोणांशकटाकारां शूर्फव्यजनसन्निभाम्।
मुरजाकारसदृशां सर्पमण्डूकरूपिणीम्।।
खराजगरसंकाक्षं वकांचिटरूपिणीम्।
मुद्गराभांतथोलूक काकसर्पनिभां तथा।।
सूकरोष्ट्राजसदृशां धनुः परशुरूपिणीम्।
कृकलप्शशवाकारं दुर्गम्यां च विवर्जयेत्।। विश्वकर्मवास्तुप्रकाशिकायाम्।

विसर्जनीयभूमेः रूपभेदः त्रिकोणाकारभूमिः, शकट - शूर्पाकार - व्यजन - मुरज - सर्प - मण्डूक - गर्दभ - अजगर - बक - चिट - मुद्गर - उल्लूख - काक - सूकर - उष्ट्र - अज - परशुः - कृकशाला - शवाकार - दुर्ग - कंकतादित्युक्त अरण्यभूमियः त्याज्याः भवन्ति। अत्र द्वीविंशति निन्द्यभूलक्षणमुक्तम् ----

नदीघातास्त्रितां तद्वन्महापाषाणसयुताम्।
पर्वताग्रेषु संलग्नां गर्तां विवरसंयुताम्।।
वक्तां सूर्यनिभां तद्वलकुटाभां कुरूपिणीम्।
मुसलाभां महादोषां वायुना वापि पीडिताम्।।
भल्लभल्लूकसंयुक्तां मध्ये विकटरूपिणीम्।
श्वश्रृगालनिभां रूक्षां दन्तकैः परिवारितम्।।
चैत्यश्मशानवल्मीक धूर्तकालयवर्जिताम्।
चतुष्पथमहावृक्ष देवमन्त्रिनिवासितम्।
दुराश्रितां च भूगर्त युक्तां चैव विवर्जयेत्।।

नदीतीरसमीपस्ताभूमिः महापाषाणसंयुक्ताभूमिः, पर्वतशिखरभूमिः, गर्तभूमिः, महारन्ध्रसंयुक्तभूमिः, वक्राकारभूमिः, सूर्यवत्अतिउष्णयुक्तभूमिः, लकुटतुल्याभूमिः, मुसल -घोर - वायुपीडिता - कुरूपा - भल्ल भल्लूकादि निवसिताभूमिः, मध्येविकटाकारभूमिः, भैरव(शुनक) श्रृगालवत् भूमिः, रूक्षभूमिः, दन्तयुक्तभूमिः, बोद्धाल्य भूमिः, श्मशानभूमिः, वलमीक धूर्जगृहैः किञ्चित्कालपर्यन्तं अनुभूत्वा विसर्जिता। भूमिः चतुष्पथ महा वृक्षच्छायाबूमिः, देवालय,मन्त्रिगृहाणि शिथिला भूमिः, सुदूरस्थाभूमिः, गृहनिर्माणेषु त्याज्या भवति। अत्र त्रयो-विंशतिभूमेः निन्द्यलक्षणमुक्तम् ---

निन्द्यभूमिवासफलम् :-

त्रिकोणा शकटाकारा शूर्पव्यजनसन्निभा।
क्रमेण सुतसौख्यार्क धर्महानिकरीस्मृता।।

त्रिकोणाकारभूमिः -सन्तानहानिः, शकटाकारभूमिः - सौख्यहानिः, शूर्पाकारभूमिः - धनहानिं

कल्पयति। व्यजनाकारभूमिः धर्महानिं करोति। मुरजाकारभूमिः वंशहानिं, सर्पाकार - मण्डूकाकारभूमिः भयं उत्पादयति। खराकारभूमिः निर्धनत्वं, अजाकारभूमिः मृत्युभयं कल्पयति। चिपिटाकारभूमिः पौरुषहीनं करोति, मुद्गराकारभूमिः, काकाकारभूमिः उल्लूखाकारभूमिः क्रमेण दुःखं जनयति शोकं, भयं च कल्पयति। सर्पाकार भूमिः पुत्रपौत्र हानिं जनयति। एवं निन्द्यभूवासप्रयोजनमुक्तं भवति।

५. चातुर्वर्ण्ययोग्यभूलक्षणम्

१. निऋत्यग्नियमेषूंच्च नीचं चन्द्रमसं प्रति।
द्विजेन्द्राणां तु सुस्थानमवनी समुदाहृता।।

आग्नेयदक्षिणनैऋतिदेशे उच्चस्थानतु उत्तरे नीचमस्ति चेत् अन्यदिशसमानीतं चेत् तत्स्थले नाम सुस्थानं इति व्यवहरन्ति। अस्मिन् स्थले द्विजनिवासार्थं प्राशस्तम्।।

२. नीचमिन्दे भवेदुच्चं निऋरूत्यां पश्चिमानिले।
सुलभं नाम तद्वास्तु राजराष्ट्रविवर्धनम्।।

सुलभवास्तु नाम नैऋतिपश्चिमवायव्यानां उच्चं भवेत् प्राक् नीचं भवति चेत् अन्यदिशाः समानं भवति। तद्भूमि राजनिवासार्थं योग्या भवति।।

३. सौम्येश पवनेषूच्चं नीचं भवति चौड्यमे।
नाम्ना वास्तुवरं नाम वैश्यानां तदभीष्टकृत्।।

वास्तुवरस्थले उत्तरईशान्यवायव्येषु च उच्चं भवति चेत् दक्षिणे नीचं भवति चेत्, अन्यदिशाः समानं भवति तत्स्थलं वणिजानां युक्ततमा भवति।।

४. नीचं वरुण मुच्चंचेदीशानेंद्राग्निषु क्रमात्।
सत्पदं नाम तद्वास्तु शूद्राणां तदभीष्टकृत्।।

सत्पदं नाम ईशान्यपूर्व आग्नेयेषु उच्चं भवति चेत् पश्चिमदिशि नीचं भवति चेत् अन्यदिशः समानं भवति चेत् सा भूमिः कृषीवलानां कर्मकारिणां निवासयोग्यं भवति।।

६. वास्तुपुरुषदृष्टिः.

त्रैमासिकवास्तुपुरुषस्थिति पद्धतिः पूर्वदिशि शिरं संस्थाप्य वाम भागे वास्तुपुरुषः शयनं करोति। अतः एतेषु मासेषु पश्चिमदक्षिण सिंहद्वार गृहाणां आरम्भम कुर्वन्ति। मार्गशीर्ष - पौष्य - माघ मासेषु दक्षिणे शिरं संस्थाप्य वास्तुपुरुषः शयनं करोति। एतेषु मासेषु पश्चिमोत्तरसिंहद्वारगृहारम्भं कुर्वन्ति। फाल्गुण - चैत्र-वैशाखमासेषु पश्चिमे वास्तुपुरुषः शिरं संस्थाप्य निद्रां करोति। एतेषु मासेषु प्रागुत्तर गृहारम्भसिंहद्वारं कुर्वन्ति

ज्येष्ठ - आषाढ - श्रावणे उत्तरदिशि शिरं संस्थाप्य निद्रां करोति वास्तुपुरुषः। एतेषु मासेषु दक्षिणप्राकद्वारगृहारम्भं कुर्वन्ति। वास्तु पुरुषस्थिति दृष्ट्या अभिमुखसिंहद्वारगृहाणि पादाभिमुखसिंहद्वारगृहान् उद्दिश्य तेषु तेषु मासेषु न गृहारम्भः। एतत् बहवः देशाचारप्रसिद्धाः वसिष्ठनारदसंहिताणां मूलप्रमाणं भवति। एतत् त्रैमासिक वास्तुपुरुषस्थितिदृष्टि विधानम्।।

क्षणिकवास्तु निर्णयम् :-

वास्तुपुरुषः प्रतिदिने अहः प्रथमयामे निशि प्रथमयामे उत्तरे शिरः प्राक् दृष्टिं निधाय निद्रां करोति। तस्मात् कारणात् प्रथमयामे पूर्वदिशः सिंहद्वारस्य दक्षिणदिशः, सिंहद्वारस्य च शंकुस्था--पनं कुर्यात्। द्वितीययामे वास्तुपुरुषः पूर्वदिशि शिरं संस्थाप्य दक्षिणदृष्टिं प्राप्नोति। अतः द्वितीययामे दक्षिण पश्चिमसिंहद्वारगृहयोः शंकुस्थापनं कुर्यात्।।

तृतीयमासे वास्तुपुरुषः दक्षिणे शिरं संस्थाप्य पश्चिमदृष्टिं प्राप्नोति। अतः पश्चिमोत्तर सिंहद्वारगृहयोः शंकुस्थापनं कृर्यात्। चतुर्थयामे वास्तुपुरुषः पश्चिमे शिरं स्थाप्य उत्तरदृष्टि प्राप्नोति। अतः चतुर्थयामे पूर्वोत्तरसिंहद्वारगृहयोः शंकुस्थापनं कुर्यात्।। पूर्वोक्तत्रैमासिक वास्तुपुरुष स्थितिरीत्या गृहस्य शंकु-स्थापनकालः न लभ्यते चेत् क्षणिक वास्तुनिर्णयानुसारेण गृहनिर्माणं कुर्यात्। तथैव चतुर्दिक्षु सिंहद्वारस्थापन

वेलायां शंकुस्थापनं सर्वेषु मासेषु कर्तुं शक्यते। यदा सूर्यः स्थिरराशिषु वृषभ-सिंह-वृश्चिक-कुम्भराशिषु भवति तदा एकशाला सर्वमुखगहाणां शंकुस्थापनं कुर्यात्।।

७.चतुर्विध वास्तुभूलक्षणम्.

१.गजपृष्टवास्तुः :-

दक्षिणे पश्चिमे चैव नैरृत्यां वायुकोणके।
एभिरुच्चाद्भवेद्भूमिः गजपृष्टाभिधीयते।।
गजपृष्टो भवेद्व्यासो सलक्ष्मीधनपूरितः।
आयुर्वृद्धि करोन्नित्यं ध्यायते नात्रसंशयः।।

२.कूर्मपृष्टः :-

मध्ये त्वच्चं भवेद्यत्र नीचंचैन चतुर्दिशम्।
कूर्मपृष्टा भवेद्भूमिः तत्र वासः शुभप्रदः।।
कूर्मपृष्टे भवेद्वासो नित्योत्साह सुखप्रदः।
धनधान्यं भवेत्तस्य निश्चितं विपुलं सदा।।
भूमिः कूर्माकारवत् भवति चेत् शुभम्।।

३.दैत्यपृष्टवासः :-

पूर्वाग्निईशान्यशम्भु कोणेषु भूमौ यज्युन्नतिः भूयात्।
पश्चिमान्ते यदानीशं दैत्यपृष्टाभिधीयते।।
दैत्यपृष्टोभवेद्वासो लक्ष्मीर्नायाति मन्दिरे।
धनरपुत्रपशूनाञ्च हानिरेव न संशयः।।

४. नागपृष्टवासः :-

पूर्वपश्चिमयोदैर्घ्यं दक्षिणोत्तरउन्नता।
नागपृष्टं विजानीयात् कर्तुरुच्चाटनं भवेत्।।
नागपृष्टे यदा वासो मृत्युरेव न संशयः।
पत्निहानिः पुत्रहानिः शत्रुवृद्धिः पुनः पुनः।।

८.षोडश भूलक्षणम्.

१. आयतं चतुरस्रं च वृत्तं भद्रासनं तथा।
चक्रं विषमबाहुरस्यात् त्रिकोणं शकटाकृतिः।।
दण्डं च पणवस्थानं मुरदश्च बृहन्मुखम्।
व्यजनं कूर्मपृष्टं च धनुः सूपं च षोडशच।।
एवं षोडशसंस्थानं वास्तुलक्ष्यं शुभाऽशुभम्।
चिन्तनीयं सदा विज्ञैरात्मा श्रेयोलाषिभिः।।

१.आयतम् :-

आयतम् सिद्धयस्सर्वाः वांच्छितार्थफलप्रदाः।

२.चतुरस्रम् :-

लक्ष्मीचाञ्चल्यहितां चतुरस्रे धनागमः।

३.वृत्तम् :-

वृत्तम् ज्ञानविवृद्धिश्च धनवृद्धिश्च कारणम्।

४.भद्रासनम् :-

सुखसौख्यविवृद्धिश्च भद्रं भद्रासनं भवेत्।।

५.चक्राकारम् :-

चक्रे दारिद्र्यमित्याहुः सुखसोख्यञ्चनाशनम्।

६.विषमाकारम् :-

विषबाहुर्यदाभूमिः शोकसन्तापकारिणम्।

७.त्रिकोणाकारम् :-

राजभीतिस्त्रिकोणश्च सुखसौख्यविनाशनम्।

८.शकटाकारम् :-

शकटमर्थनाशञ्च श्रमजीवनकारणम्।

९.दण्डाकारम् :-

दण्डाकारं भवेद्रोगं पशुधान्यविनाशनम्।

१०.पणवाकारम् :-

पणवे अक्षिरोगस्स्यात् अन्धत्वं वंशजातया।

११.मुरजाकारम् :-

मुरजे वंशहानिस्स्यात् नष्टसन्तानकारणम्।

१२.बृहन्मुखाकारम् :-

कष्टाधिको प्रवासश्च बन्धुनाशो बृहन्मुखे।

१३.व्यजनाकारम् :-

व्यजनं वित्तनाशंस्याद्व्यापारोद्योगभंगदम्।

१४.कूर्मपृष्टाकारम् :-

कूर्मपृष्टे शोकं च बन्धनं राजदण्डनम्।

१५.धनुराकारभूमिः :- यशोहानिर्यदानित्यं चापे चोरभयं भवेत्।

१६.शूर्पाकारभूमिः :- शूर्पाकारे महाव्याधिरष्टदारिद्र्यकारणम्।

निन्द्यत्रयभूमिः :-

चण्डालविषचोरैश्च शिरोरोगादिभिस्तदा।
मरीच गुलगन्धाड्याः राक्षसाराभयप्रदा।।

भूमिः त्रिधा भिद्यते। चण्डाल - विषवृक्ष - चोरैश्च समायुक्ता इति। तादृश्या भूम्या वायुना शिरो वेदना जायते। मरीचिगुल वासनायुक्ताभूमिः राक्षसभूमिः इत्युच्यते। तत्त्याप्यं भवति।

शाल्मीलिभिस्तथा भूमिः वकुलैश्च विभीतकैः।
श्लेभान्तकै खरैरुष्ट्रैः श्टगालै स्सूकरैः पुनः।।
चण्डालैश्च पुलिंदैश्च पूतिगन्धो षराच सा।
पिशाचेति स्मृताशास्त्रै सर्वानाशनसमन्विता।।

शाल्मली, गर्दभैः, उष्ट्रैः, जीनजातिजनैः, दुर्वासनैः समायुक्ता भूमिः पिशाचभूमिरित्युच्यते। तादृशी भूमिः गृहनिर्माणाय त्यक्तव्या भवति।

गोमायुगुणसंकीर्णा झिल्लिका शर्करान्विता।
या वायुव्येति संप्रोक्ता दुःखनैर्दैन्यदायका।।

श्रृगालसमूहैः, कण्टकवृक्षसमूहैः कंकणपाषाणैः समायुक्ता भूमिरपि गृहनिर्माणाय अयोग्या भवति।

चण्डालवासगच्छाया चर्मका रालयाश्रिता।
भुजंगनिलयं चैव शंकराराममेव च।।
श्मशानं चाश्रमस्थानं कपि सूकर सन्निभम्।
तक्षणाद्वर्जयेत्भूमिं श्रेयेच्चमनीषिभिः।।

चण्डालजनानां गृहच्छाया वा वायुर्वा पतति चेत् अधिकसपसञ्चारभूमिः, रुद्रभूमिः, श्मसानसमीप भूमिः, यतिनिवसितभूमिः अर्थात् मठाश्रमभूमिः, मर्कटाकारभूमिः, सूकराकारभूमिः, निन्द्या भवति। अतः श्रयोभि -लाषिजनैः तक्षणं त्यक्तव्या भूमिः भवति।।

## ९. गृहारम्भगृहप्रवेशयोः मुहूर्तः.

गृहारम्भस्य युक्तकालः :-

आयनयोः :- उत्तरायणम्।

मासेषु :- चैत्र - वैशाख - कार्तीक - माघ मासाः।

शुक्लपक्षे :- २,३,५,७,१०,११,१३ तिथयः प्रशस्तकः।

कृष्णपक्षे :- अन्त्यपञ्चकं न योग्यम्। अवमात्रिद्युस्पृक् इत्यादयः। दुष्टतिथयः न योग्याः।

नक्षत्रेषु :- रोहिणी, मृगशीर्षा, उत्तरा, हस्ता, चित्रा, मूला, उत्तराषाढा, श्रवणम् एतानि नक्षत्रा प्रशस्तानि। अश्विनी, पुष्यमी, स्वाती, अनूराधा, शतभिषा, उत्तराभाद्रा, रेवती एतानि सप्त नक्षत्राणि मध्य- -मानि भवन्ति। शेषानि नक्षत्राणि दुष्टानि भवन्ति।

वारेषु :- सोम्य - बृहस्पति - भृगु - पूर्णेन्दुवाराः प्रशस्ताः। परिघा, वैधृति, व्यतीपात्, गण्ड, अतिगण्ड, व्याघात योगाः अप्रशस्ताः।

भद्रकरणम् न योग्यम्। स्थिरलग्नद्वितीयभाव लग्नैः सुभः। वृषभलग्नः प्रशस्तः। पापग्रहाः अष्टम शुद्धिः भवितव्या। केन्द्रत्रिकोणेषु पापिणः न भवेयुः। शुभग्रहाः केन्द्रत्रिकोणेषु भवति चेदपि पापग्रहाः ३,६,११ स्थानेषु भवन्ति चेहपि शुभप्रदः। गुरुशुक्रयोः मौढ्यम्। गुरुशुक्रयोः राशिप्रवेशानन्तरं किञ्चित्कालः बाल्यं तथैव वार्धक्यमपि गृहारम्भस्य शुभकालः नैका भवन्ति।

गृहप्रवेशमुहूर्तः :- प्रवेशे द्वादशे शुद्धिः इत्युक्तप्रकारेण गृहप्रवेशमुहूर्तरासिचक्रे द्वादशस्थाने कोऽपि ग्रहः न भवेत्। अर्थात् तत्स्थानं रिक्तं भवितव्यम्। उत्तरायणम् - माघ - फाल्गुण - वैशाख - ज्येष्ठमासाः प्रवेशस्य शुभमासाः भवन्ति। रवि यदा कुम्भराशौ प्रविशः तदा कुम्भसंक्रमणम् इत्युच्यते। सः मासः (माघमासः) प्रवेशाय

नोपपद्यते। शुक्लपक्षे २,३,५,७,१०,११,१३ तिथयः कृष्णपक्षे १,२,३,५ तिथयः शुभाः अन्त्यपञ्चकं त्याज्यम् वा त्रिद्युस्फृक् आदौ दुष्टतिथयः न योग्याः। सौम्य, बृहस्पति, भृगु, पूर्णेन्दुवासरः (शुक्लपक्षे सोमवासरः) शुभ–वासराः। रोहिणी, मृगशीर्षा, उत्तरा, चित्ता, अनूराधा, उत्तराषाढा, शतभिषा, उत्तराभाद्रा, रेवती, श्रवणम् एतेषु नक्षत्रेषु यदा गृहप्रवेशः क्रियते तदा तद्गृहं अन्याक्रान्तं भवति। पूर्वोक्तनक्षत्रेभ्यः अतिरिक्तानि नक्षत्राणि शुभानि न भवन्ति। परिघादि योगाः भद्रकरणञ्च न शुभानि। यदि कर्तयां गृहस्य शंकुस्थापना क्रियते तर्हि तत् गृहं अग्निप्रीतिकरं भवतीति कालामृते कृष्णवास्त्वादि ग्रन्थेषु उक्तमस्ति। जन्मराशौ गृहप्रवेशः शुभप्रदः। बृहस्पति, भृगुवासरयोः मौढ्य, बाल्य, वार्थक्य, चातुर्मास्यलिः शून्यमासकालस्य त्याज्यकालः भवति।स्थिरलग्नद्विस्वभाव लग्नौ शुभलग्नौ। वृषभलग्नः प्रशस्तः भवति। केन्द्र, त्रिकोणयोः पापग्रहाः मुख्यः भवति। कलशवृषभचक्रयोः फलमपि द्रष्टव्यं भवति।

गृहनिर्माणस्य शुभमासाः :-

चैत्रमासः - शुभप्रदः, वैशाखमासः - सम्पत्प्राप्तिः, ज्येष्ठमासः - मृत्युप्रदः, आषाढमासः - सम्पन्नाशः श्रावणमासः - शुभप्रदः, भाद्रपदमासः - रोगभयः, आश्वयुजमासः - कलहः, कार्तीकमासः - धनयोगः, मार्ग-शीर्ष - धान्यः, महाभयश्च, पुष्यमासः - चोरभयः, अग्निप्रमादश्च, माघमासः - वंशाभिवृद्धिः, फाल्गुणमासः - धनलाभः।

विवाहात् संवत्सरकाले यदा भार्या गर्भवती भवति ततः षन्मासाभ्यन्तरे गृहनिर्माणं न कार्यम्। वास्तु पुरुषस्य सिंहद्वारः मुखं भवति। सिंहद्वारानुसारेण इदं गृहं पूर्वाभिमुखं दक्षिणाभिमुखं पश्चिमाभिमुखं अथवा उत्तराभिमुखं इति वक्तुं शक्यते।।

## १०.द्वादशग्रामलक्षणम्.

१.मण्डकग्रामः :-

प्राचीं गता मुख्यवीथी वीरुणीं स्पृशते यदि।
अन्याभिस्तिसृभिर्युक्ता स्थली स्यान्मिख्यवास्तुषु।।
वारुण्यां देवतागारं विन्यसेच्च क्रमाद्यदि।
विप्रैरधिकसंख्याकैर्मण्डकग्राम ईरितः।।

पूर्वप्रतिपादितेषु सद्वास्तुषु यत्र स्थले प्रातीदिशो मुख्यवीथी प्रतीचीं दिशं गाहते, यत्र वारुण्यां दिशि शिवस्य विष्णोर्वा मन्दिरं निर्मीयते, तादृषमन्दिरं तां च मुख्यवीथीमावृत्य कुबेरेन्द्रयमदिग्भाजस्तिस्त्रोऽन्या विपुला वीथ्यो वर्तते,यत्र च इतरजनसंख्यापेक्षया विप्राणमेवाधिकसंख्या मण्डकप्राममिति सिद्धान्तिनो वदन्तीति भावः।

२.प्रस्तरग्रामः :-

प्राक्प्रतीचीप्रतोल्यस्तु चतस्रः संमुखान्वितः।
तथैव यत्र संभक्ता दक्षिणाधनदाशयोः।।
मध्यगा सैव वीथी तु मध्यवीथीति गद्यते।
मध्यभागस्थितं शर्वमन्दिरं सुन्दराकृति।।
परिघाकारवीथी वी परितः परिघापि वा।
पूर्वद्वारसमोपेतं प्रत्यग्भागदलक्षणम्।।
विपणिश्चाप्यथैशान्यां बहुवस्तुसमावृता।
विप्रैरधिकसंख्याकैस्य युक्तः प्रस्तरो मतः।।

यत्र ग्रामे प्राचीं दिशमारभ्य वरुणदिग्गामिन्यः चतस्रो वीथ्यस्तथैव दक्षिणां दिशमारभ्योदीची दिग्गामिन्यः चतस्रः विथ्यो वर्तन्ते। सोऽयं ग्रामो नाम्ना प्रस्तरग्राम इति भण्यते। अस्ति प्रस्तर ग्रामे सर्वा अपि वीथ्यः परस्परं सम्मुखगृहान्विताः कार्याः। किञ्चात्र सर्वत्र वीथीषु मध्यगामिनी यातिर्यग्वीथी तस्या एव मध्य वीथीति व्यवहार इति भावः। ग्रामस्यास्य मध्यभाग एव शिवस्य मन्दिरनिर्माणङ्कार्यम्। किञ्चामुं ग्रामं परितो

लघुपरिखां वा परिखाकारवीथीं वा कारयेत्। अपि च ऐन्द्रगामेव दिशायामस्य ग्रामस्य मुख्यमार्गकल्पनामित्यु-क्तत्वात् अस्यैन्द्रदिग्गतो मुख्यो मार्ग एक एव नान्यत्रेति सूच्यते। वापीतटाकादिकन्तु वारुण्यां दिश्येव। विपणि-स्त्वैशान्यामेव कार्येति। किञ्चेतरजनगृहापेक्षया विप्रजातिगृहाधिक्यमेवात्रेति प्रस्तरग्रामलक्षणः।।

३.बाहुलिकः :-

प्राक्प्रतीच्योः पञ्च वीथ्यो वर्तन्ते विपुला यदि।
तथैव याम्यां कौबेरीमाश्रिताः पूर्वदिङ्मुखाः।।
लघुप्रवेण संयुक्तो विपण्यादिभिरावृतः।
मध्ये शिवस्थलोपेतो दक्षिणस्थजलाशयः।।
नानाजातिभिराकीर्णो ग्रामपालालयान्वितः।
सस्यभूमिसमायुक्तो ग्रामो बाहुलिकः स्मृतः।।

यत्र ग्रामे प्राचीदिगारब्धाः विपुलाः पञ्च वीथ्यः प्रतीचीं दिशं भजन्ति, सोऽयं बाहुलिकः इति निगद्यते। किञ्चास्य ग्रामस्य प्रतीच्यामेव मुख्याद्वारं कल्पनीयम्। ग्रामस्यास्य मध्यभाग एव शिवमन्दिरनिर्माण-मपि शस्तम्।ग्रामोऽयं लघुप्रवेण संवृतो भवति।बहुवस्तुसमृद्धविपणिमन्याञ्च सौकर्यकारिणीं शालां यथेष्टस्थले स्थापयेदिति भावः। नैयत्येनात्र जलाधारभूमिस्तटाकादिः दक्षिणस्यामेव कार्यः। किञ्चायं ग्रामो ग्रामाधिपालय समेतो बहुजातिजनाकुलश्च। किञ्चायं ग्रामं परितः सस्ययोग्यभूमिश्य शस्तेति बाहुलिकग्रामलक्षणार्थः स्फुटः।

४.पराकः :-

एकवीथ्या समायुक्तः कौबेर्यामैशगेहभाक्।
सहस्रजनता यत्र विप्रहीना च भण्यते।।
यस्यां जलाशयोपेतः कार्षिकैर्बहुभिर्युतः।
पश्चिमद्वारसंयुक्तः परिघासंवृतोऽपि वा।।
याम्यभाग्विपणिश्चैव शालीसस्यरसान्वितः।
सोऽयं ग्रामश्शास्त्रविद्भिः पराक इति कीर्त्यते।।

यत्र स्थले एका मुख्यवीथी अतिदीर्घा वर्तते, उत्तरास्यां दिशि कल्पितं शिवमन्दिरम्, प्रादक्षिण्य क्रमेणावृता चतुरश्रा वर्तुला वा वीथी क्रियते, यत्र विप्राणां संख्या हीनाऽन्येषां संख्याधिक्यमाहतिक्रमेण विञ्चि--न्न्यूनाधिकसहस्रजनता गण्यते, यत्र च दक्षिणस्यां दिशि तटाकदिजलाधारः, प्रायशः कृषीवलैरेवाक्रान्तः, वारुण्यां मुख्यद्वारेण संयुतश्च। परिखासंवृतेऽपि वेत्युत्कत्वात्केषाञ्चिन्मते पराकग्रामस्यास्य परिखावृतत्वमप्यभि-प्रेतमिति भावः।।

५.चतुर्मुखः :-

चतुर्दिक्स्थचतुर्द्वारं मध्यभाग्देवमन्दिरम्ष।
पञ्च वीथ्यः प्रतिदिशमथवा द्वादश स्मृताः।।
लघुप्रवेण संयुक्तो नानजातिजनान्वितः।
ऐन्द्र्यामपि च वारुण्यां वाप्यादिजलसंयुतः।
दक्षिणस्यां पण्यवीथी तत्रैव ग्रामपालकः।
भूपालज्ञाकरी शाला कौबेर्या कल्पिता यदि।।
सोऽयं ग्रामश्शास्त्रविद्भिश्चतुर्मुख इतीरितः।।

यत्र ग्रामे प्राच्यादिषु चतसृषु दिक्षु द्वारचतुष्कं क्रियते, ग्रामस्य मध्यमभागे देवतायतनं क्रियते, तदायतनं परितश्चतसृष्वपि दिक्षु पञ्च वीथ्यः कल्प्यन्ते। यथैका मुख्याप्रतोलिका तदुभयतः प्रतोलिकाद्वयमिति तथा चाहतिक्रमे विंशतिवीथिकायुतग्राम इति विवेकः।

६.पूर्वमुखः :-

प्राच्यां मुखद्वारयुतः परिखावृतवास्तुकः।
वैश्यसंख्याधिक्ययुतः पण्यवीथीभिराकुलः।।
नानाजातिभिराकीर्णो नृपालयसमन्वितः।
उदीच्यामथ वारुण्यां देवतायनं सुभम्।।
तत्र तत्र जलोपेतत्रिंशद्वीर्थाभिरावृतः।
उपवीथीयुतो वापि पुरद्वारेण संयुतः।।
ग्रामकार्यकरेरन्यैः संयुतश्च समन्ततः।
नाम्ना पूर्वमुखग्रामः कथितोऽयं महर्षिभिः।।

यत्र स्थले मुखद्वारं प्राच्यां दिशि क्रियते। किञ्च यत्र स्थले विशेषमहिता वास्तुभूमिः परिखावृता च क्रियते। तादृशोऽयं ग्रामः पूर्वमुख इति पूर्वैर्महर्षिभिरुदीर्यत इति श्लोकार्थः।।

७.मङ्गलः :-

प्राच्यामपि च वारुण्यां मुखद्वारसमन्वितः।
प्राचीदिशः प्रतीचीगाश्चतस्रो वीथिकास्तथा।।
याम्यकौबेरगा वीथ्यः षड्भागेन समन्विताः।
चतुर्विंशत्प्रतोलीभिर्युक्तः परिघयावृतः।।
प्रतीच्यां मध्यभागे वा देवतायतनं शुभम्।
गोपुरेण समायुक्तो ग्रामन्तरपथा युतः।।
नानाजातिभिराकर्णो विपण्यादिभिरावृतः।
मठमण्टपसंयुक्तो जलाधारसमन्वितः।।
नाम्नायं मङ्गलग्रामो भण्यते शास्त्रपारगैः।

यस्यां वास्तुभूमौ प्राच्यां प्रतीच्याञ्च दिशि गमनागममयोग्यं मुखद्वारयुतं कल्प्यते। तथा प्राचीदिशः प्रतीचीगामाश्चतस्रो विपुला वीथ्यस्तथैव दक्षिणोत्तरगामश्चतस्रो वीथ्य एकभागभाजो भवन्ति, तस्या वास्तुभूमेर्मङ्गलग्राम इति शास्त्रपारगा वन्दतीति विवेकः।।

८.विश्वकर्मः :-

नदीतिरगता प्रायः उत्तमा वास्तुभूरपि।
पूर्वपश्चिमगं द्वारमथवा दक्षिणोत्तरम्।।

नदीतीरगतां पूर्वोक्तप्रकारेणोत्तमां वास्तुभूमिमासाद्य यदि तत्र ग्रामनिर्माणमधः प्रदर्शितलक्षणोपेतं क्रियते सोऽयं विश्वकर्मग्राम इति नामभाग्भवति।।

९.देवेशः :-

कालीहरिहरादीनां दिक्पालनाञ्च सर्वशः।
देवायतनसंयुक्ता प्राक्पश्चिममुखान्विता।।
विशेषतो जलोद्गारभूरियं परिकीर्तिता।
पक्षद्वयगृहोपेताः त्रिंशद्वीथ्यः प्रकीर्तिताः।।

विशेषतो जलाधारसहितायां यस्यां वास्तुभूमौ कालीहरिहरदिक्पालचण्डीगणपतिषण्मुखादीनां बहूनां देवानामायतनं क्रियते, प्राक्पश्चिमादिग्गतं मुख्यमार्गद्वयं च कल्प्यते। पक्षद्वयगृहोपेतानां वीथीनां त्रिंशत्कमेपक्षगृहयुतं वीथीद्वयञ्चाहत्य द्वात्रिंशद्वीथिकाः यथोचितं स्थाप्यन्ते। वास्तुभूमिरियं नाम्ना देवेशग्रामः कीर्त्यत इति भावः।।

१०.विश्वेश :-

दक्षिणोत्तरगाः पञ्च वीथ्यस्सुविपुला यदि।
प्राक्प्रतीचीगतः पञ्च वीथ्यश्च क्षुद्रकोगणाः।।

यस्यां वास्तुभूमौ दक्षिणोत्तरमुखा विपुलाः पञ्चप्रतोल्यस्तथैव सममानाः प्राक्प्रतीचीगताः क्षुद्रवीथिकाख्योपजीविभिर्युताश्च पञ्च वीथ्यः कल्प्यन्ते। सेयं वास्तुभूमिर्विश्वेशग्राम इति विबुधैः सन्निगद्यत इति लक्षणार्थः।

११.कैलासः :-

समुद्रतीरगां भूमिमथवा गिरिसानुगाम्।
वर्तुलां वास्तुभूमिं वा चतुरश्रामथापि वा।।

समुद्रतीरगा भूमिः, गिरिसानुस्थिता भूमिः, वर्तुला भूमिः, चतुरस्रा भूमिः। एवं विधास्सर्वा अपि वास्तुभूमयो यदि उत्तमगुणोपेतास्तदा तासु भवनादिकं कार्यमित्युक्तवान् कैलासनामभाजोऽस्य ग्रामस्य भूमिस्समुद्रतीरगा वा गिरिसानुगा वा स्वीकार्येत्याशयः।।

१२. नित्यमङ्गलः :-

चतुर्दिक्स्थचतुर्द्वारं महागोपुरसंयुतम्।
महापथेन संयुक्तं सर्वतः परिखावृतम्।।

यत्र स्थले प्राच्यादिषु चतसृषु दिक्षु चतुर्मार्गकल्पनं निर्मीयते। तेषां चतुर्णां प्राच्यादिद्वारणामुपरि त्रितलसमन्वितं पञ्चतलसमन्वितं वा गोपुरं च क्रियते। यच्च वास्तुस्थलं प्रतिदिशं बहुदूरदेशमार्गसहितश्च क्रियते यच्च वास्तुस्थलं सर्वतः परिखया वृतश्च क्रियते। तस्य नित्यमङ्गलग्राम इति नाम प्रसिद्धम्।।

## ४.२. देवालय वास्तु परिचयः

ग्रामे देवालय स्थान निर्णयः :-

आर्यादिषु चतुर्दिक् ग्रामस्वापि चतुर्दिशि।
एवं एवेक्ष दिशे दिशे विष्णुं दक्षं प्रकल्पयेत्।।
पितुर्देवेषु कौनेव यदा नृसिंहं आलयं भवेत्।
आग्नेय कोणे तदा शमं गोपालालयं मे वचः।।
ग्रामस्वाभिमुखं विष्णुं नृसिंहं परान्सुखम्।
लक्ष्मी नृसिंहंश्चेत् वापि ग्रामस्याभिमुखं भवेत्।।

पुष्करिमध्ये एकं मण्डपं भवति तलामस्वाल मण्डपमिति। अष्टादिशि अष्टदिक्पालकानां विग्रहं स्थापनीयम्।अष्टम,षोडश,द्वात्रिंशत् वा स्थालाः देवालयकल्याणोत्सव मण्डपे निर्माणं करणीयम्। आग्नेयदिशि पाकशाला, तत् समीपे कूपनिर्माणं च। नैऋत्यदिशि वाहनशाला, वायव्यदिशि आभरणशाला, दलशाला, ईशान्य दिशि धान्यशाला तथा गोशाला च निर्मातव्या।।

प्रतिमाप्रमाणम् :-

ब्रह्म, इन्द्राद्यष्टदिक्पालकाः,कार्तिकेयः, गवेशः, चण्डीश्वरः, वीरभद्रः,नन्दीश्वरः,विष्वक्सेनः, महाविष्णुः, महेश्वरः, आदित्यादि नवग्रहाः, शक्तिः, लक्ष्मी, पार्वती, सरस्वती, महाबली, अपर्णा, अन्नपूर्ण, गौरी, भैरवी, दुर्गा, महिषमर्दिनी, गौरी सहित परमेश्वरः, भवानी, क्षेमङ्करी, चामुण्डी, रमा, पद्महस्ता, नारायणी, भूदेवी, नीला, श्रीदेवी इत्यादि देवतानां प्रतिमारूपाः भवति।।

नवतालनिर्णयः :-

शिरः - ४(अङ्गुलः) देहः - २४ ऊरु - २४ मुखं - १२. नितम्बम् - ०२. जानु - ०४. ग्रीवं - ०४. कटी - ०४. जङ्घम् - २४.

दशतालनिर्णयः :-

शिरः - ४(अङ्गुलः). देहः - २४. ऊरु - २६. गुल्फं - ०३. मुखं - १२. नितम्बम् - ०४. जानु-०५. ग्रीवं - ०४. कटी - ०५. जङ्घम् - २६. अनन्तरं अधोभागः - ०३, करम् - १२ ...........।।

देवतापीठम् :-

देवतापीठम्, उत्सवपीठम्, पद्मपीठम्, शेषपीठम्, कुमुदपीठम्. भद्रपीठम्, सोमादिपीठम्।।

उत्सवपीठम् :-

मङ्गलाकारं, चतुरस्रं, द्वादशास्तं, दीर्घाकारं, षोडशास्त्रं, अर्धाकारं, चन्द्रं, त्रिकोणाकारं, धनुराकारं इत्यादि ।। गर्भालयात् प्राक्भागे अन्तरालये भद्रमण्डपं करणीयम्।।

बलिपीठम् :-

आलयप्रधानद्वारे द्वारपालकाः शिवः, नन्दीश्वरः, कालभैरवः, गर्भालयं अन्तरालयं वा द्वयमपि समानित्व्यं। मुलविराट् प्रमानानुसारेण पीठनिर्माणं, पीठप्रमाणानुसारेण गर्भप्रमाणम्, गर्भप्रमाणानुसारेण शिखरप्रमाणम्, शिखर प्रमाणानुसारेण ध्वजप्रमाणं, ध्वजप्रमाणानुसारेण गोपुर प्रमाणं च भवति।।

वाहनविग्रहः :-

कल्पवृक्षं, वृषभः, सिंहः, हंसः, मयूरः, चन्द्रमण्डलरूपं, सत्पाश्वसूर्यमण्डलरूपं, आदिशेषु रूपं, गरुडः, हनुमानः, नन्दीश्वरः, रावणः, राजः, मूषकः, सेमिकः च भवति।।

देवताविग्रहाः :-

३७ बेराः सन्ति।।

शिवमूर्तयः :-

नटेश्वरः, चन्द्रशेखरः, किरातेश्वरः, मृत्युञ्जयः, पशुनायकः, गजासुरसंहारः, जडाधारी, सोम-स्कन्धः,भैरवः,दक्षिणामूर्तिः,कैलासनाथः, वृषवाहनः, अर्थनारीश्वरः, हरिनारायणः, त्रिपुरान्तकः,पार्वतीपरमेश्वरः।

विष्णुमूर्तयः :-

मत्स्य, कूर्म, वराह, नरसिंह, परशुराम, श्रीराम, बलभद्रराम, वासुदेवः, कल्किः, केशवः, नारायणः, माधवगोविन्दः, लक्ष्मीकान्तः, मधुसूदनः, तत्वोपदेशरूपं, श्रीधर, हृषीकेश, पद्मनाभ, जनार्थनेति।।

शिवलिंगभेदाः :-

वात्मीकनाथलिङ्गं, ज्योतिः, पृथ्वी, अप्लिङ्गं, तेजोलिङ्गं, वायुः, आकाशः, देवः, ब्रह्मः,महर्षि लिङ्गं इति।।

चतुर्विंशति मण्डपनामानि :-

देवालये आग्नेय्यां पाकशाला निर्माणं कृत्वा तत्र कूपं खनित्वा पाकशाल - कूपस्थलयोः मध्ये रिक्तस्थानं त्यजेत्। नैऋत्यां वाहनशाला, वायव्यां आभरणशाला, ईशान्यां धान्यशालां गजाश्व गोशालाणां निर्माणं श्रेष्ठं भवति। छत्रचामरादयः देवालयः एव स्थापनीया भवति। अभिषेकमण्डपः, अलंकारमण्डपः, आस्थानमण्डपः, कल्याणमण्डपः इति एते चतस्रः मण्डपाः देवालये युक्तस्थानेषु निर्माणं करणीयम्।।

एते मण्डपाः स्थलविस्तृतिमनुसृत्य ८ - १६- ३२- ६४- ८०- १०० स्तम्भाः एवं प्रकारेण सहस्रश्तम्भाः स्थापनीयाः भवन्ति। विश्वकर्मवास्तुशास्त्रे चतुर्विंशति मण्डपाः इति उक्ताः सन्ति। ते च –

१.अभिषेकमण्डपः. २.अलंकारमण्डपः ३.याग. ४.कल्याण. ५.आस्थान. ६.वसन्त. ७.ग्रीष्म. ८.वार्षिक. ९.कार्तिक १०.विहार. ११.जप. १२.आध्ययन. १३.वाहन. १४.प्रणयकलह. १५.प्लवोत्सव. १६.दमनकोत्सव. १७.डोला. १८.शयन. १९.मासोत्सव. २०.पालकोत्सव. २१.संवत्सरोत्सव. २२.नित्योत्सव. २३.नैमित्तिकोत्सव. २४.आखेट. एते मण्डपानां चतुर्दिक्षु भित्तयः न भवन्ति चेदपि स्तम्भाः भवितव्याः।।

**इति देवालयवास्तु परिचयः.**